वर्षम्-८

संस्कृतदिवसविशेषाङ्कः

ISSN : 975-2676

अङ्काः-२५-३२

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५२४१-४२ वैक्रमाब्दः २०७२-७३ आषाढ-शुक्ल ३ - आषाढ-कृष्णः ११ शकः १९३५-३८ जुलाई, २०१४ - जून, २०१६

## स्वागतं नवागतेभ्यः कुलाध्यक्षेभ्यः



१९५१ वर्षस्य जनवरीमासस्य ३० दिनाङ्के महाराष्ट्रराज्यस्य पुण्यपत्तने प्राप्तजन्मानः श्रीमन्तः प्रकाशजावडेकर-महाभागाः देशस्य अत्यन्तं सक्रियाः राजनीतिज्ञाः सन्ति। इमे भारतीय-जनता-पार्टी इत्याख्यस्य दलस्य प्रतिष्ठिताः नेतारः वर्तन्ते। पूना-विश्वविद्यालयात् (B.Com.) विषये पदवीं प्राप्तवन्तः। मराठीभाषायां नैकानि पुस्तकानि शोधपत्राणि च एभिः प्रकाशितानि सन्ति।

१९८४ वर्षतः १९९० वर्ष पर्यन्तं भारतीय-जनता-युवमोर्चा दलस्य अध्यक्षा आसन्। महाराष्ट्रराज्यस्य विधानसभासदस्याः आसन् १९९० तमे वर्षे। एवं २००८ तमे वर्षे महाराष्ट्रराज्यात् तथा च २०१४ तमे वर्षे पुनः मध्यप्रदेशराज्यात् राज्यसभासदस्यरूपेण चिताः। अपि च 'रुरल डेवलेप्मेण्ट एण्ड बैंक्स रोल इन कोर्डिनेशन एप्रोच' इति शोधपत्राय पुरुषोत्तमदासठाकुरस्मारकराष्ट्रियपुरस्कारः एतैः लब्धः वर्तते।

एतेषां राजनीतौ महत्त्वपूर्णं योगदानं विज्ञाय भारतसर्वकारेण परिसरविभागराज्यमन्त्रित्वेन नियोजिताः। एवं भारतसर्वकारस्य सूचनाप्रसारणमन्त्रालयस्य राज्यमन्त्रिणः अपि एते आसन्। एतेषां कार्यकौशलं ज्ञात्वा भारतसर्वकारेण अस्य वर्षस्य जुलै-मासस्य ०५ दिनाङ्के मानवसंसाधनविकासमन्त्रि-रूपेण नियोजिताः। तदनुसारेण एते राष्ट्रिय-संस्कृत-संस्थानस्य कुलाध्यक्षा अपि सन्ति। अतः वयं नूत्नेभ्यः कुलाध्यक्षेभ्यः स्वागतं व्याहरामः।

## कुलपतिवाक्

**"आनो भद्राः क्रतवो यन्तु विश्वतः"**

अभिव्यक्तिः विकासस्य मार्गदर्शिका भवति। अभिव्यक्तेः प्रकाराः विविधाः सन्ति। 'संस्कृतवार्ता' नाम्नी इयं त्रैमासिकी राष्ट्रियसंस्कृतसंस्थानस्य कार्यजातं प्रकाशयति।

लोकतन्त्रे अभिव्यक्तिः विकासः च परस्परं सहकुरुतः। समाजस्य सदस्याः अन्योन्यं व्यवहरेयुः। अभिव्यक्तेः स्वातन्त्र्यं न्यूनताः परिमार्ज्य व्यक्तित्वं परिष्कर्तुं सहकरोति। हितकरः मितः च विमर्शः समाजस्य उत्कर्षाय प्रेरयति। चिन्तनप्रधानो समाज आत्मावलोकनेन अग्रेसरति। तदर्थं संस्कृतवार्ता संस्थानपरिवारस्य कृते सिंहावलोकनं कर्तुं भाविलक्ष्यं च सङ्कल्पयितुं सहकुर्यात्।

संस्कृतभाषा हि वेदपुराणशास्त्रादिनैकरत्नानि प्रकाशयन्ती ज्ञानविज्ञाननैक रत्नानि निगूहन्ती रत्नगर्भा वसुन्धरेव विराजते। ऋषीणां प्राज्ञानां च निरन्तरतपसा लब्धः ज्ञानराशिः भाषायामस्यां विद्यते। वेदशास्त्रनिहितं ज्ञानविज्ञानम् अधुना प्रासङ्गिकं वर्तते। भारताः वयं संस्कृतभाषाबद्धायाः विज्ञानसम्पदः प्रयोगाय सन्नद्धा भवेम। प्रतिभाशालिनः संस्कृतच्छात्राः नवोन्मेषतत्त्वं पश्येयुः। तेन संस्कृत-सप्ताहादयः कार्यक्रमाः सार्थकाः स्युः "न हि ज्ञानेन सदृशम्" इति ख्यापयन्तः वयं ज्ञानचक्षुषा वीक्षामहे। राष्ट्रं विज्ञानसमृद्धं कुर्महे।

मध्येकालं सुप्ता संस्कृतवार्ता पुनः जागर्ति। संस्थानपरिसराणां क्रियाकलापान् अधिगन्तुं सम्पर्कं स्थापयति। उत्तमकार्यं (Best Practice) आत्मसात्कर्तुम् उद्बोधयति। संस्कृतजीवनस्य भूतं वर्तमानं भविष्यं च सूत्रयितुम् आचार्यकुलं जागरयति। सोऽयं जागरः छात्राणां हिताय कल्पेत।

**सं गच्छध्वं सं वदध्वम्।**
**सं वो मनांसि जानताम्।।**

इत्याशयेन संस्कृतवार्तायाः प्रकाशकगणाय शुभं कामये।


***-परमेश्वरनारायणशास्त्री***



विश्वसंस्कृतसम्मेलने भाषमाणा श्रीमती सुषमास्वराजवर्या




विश्वसंस्कृतसम्मेलनसत्रस्य एकं दृश्यम्




विश्वसंस्कृतसम्मेलनसमारोपे भाषमाणः कुलपतिवर्यः

**मुख्यपरामर्शदाता**
प्रो. परमेश्वरनारायणशास्त्री
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**
प्रो. एस्. सुब्रह्मण्यशर्मा
प्रो. मनोजकुमारमिश्रः
प्रो. सुकान्तकुमारसेनापतिः

**सम्पादकः**
डा. मधुकेश्वरभट्टः

‘संस्कृतवार्ता’-सम्बद्धं स्वीयाभिप्रायं, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

संस्थानस्य जालपुटेऽपि संस्कृतवार्ता दृष्टुं शक्यते-
**www.sanskrit.nic.in**

**संस्कृतवार्ता**
राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्
**ISSN : 975-2676**

प्रकाशकः
**कुलसचिवः**
**राष्ट्रियसंस्कृतसंस्थानम्**
(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा ‘ए’-श्रेण्या प्रत्यायितः, भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058
011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

## समुद्घाटितः नूत्नः परिसरः

संस्कृतस्य अभिवृद्धिं कामयमानस्य मानवसंसाधनविकासमन्त्रालयस्य अनुग्रहेण राष्ट्रिय-संस्कृतसंस्थानस्य परमपावनगङ्गोपकण्ठे हिमाचलोपत्यकायां देवभूमौ विराजमाने उत्तराखण्डराज्यस्य देवप्रयागे त्रयोदशः परिसरः माननीयकुलपतिना प्रो. परमेश्वरनारायणशास्त्रिवर्येण समुद्घाटि। अयं परिसरः रघुनाथकीर्तिपरिसरः इति नाम संबिभर्ति। कार्यक्रमे राज्यस्य मन्त्रिमहोदयः परिसरप्राचार्यः आचार्यः सर्वनारायणझावर्यः नागरिकाः छात्राश्च आसन्।










उद्घाटनकार्यक्रमस्य कानिचन दृश्यानि

## प्रो. एस्. सुब्रह्मण्यशर्मणा कुलसचिवकार्यभारः गृहीतः



राष्ट्रिय-संस्कृत-संस्थानस्य गुरुवायूरपरिसरे अद्वैतवेदान्तविभागस्य आचार्यः प्रो. एस्. सुब्रह्मण्यशर्ममहोदयः १६.१२.२०१५ दिनाङ्के कुलसचिव-कार्यभारं (प्र.) गृहीतवान्। अतः महोदयस्य अभिनन्दनं व्याहरामः।

## संस्कृतस्य विकासाय दीर्घावधिपरिकल्पना एवं क्रियाविधिः

### ( Vision and Road map )

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयेन संस्कृतस्य विकासाय दीर्घावधिपरिकल्पना एवं क्रियाविधिः (Vision and Road map) इत्यस्य निर्मितये काचित् समितिः आरचिता।

| | | |
|---|---|---|
| १. | श्री एन.गोपालस्वामी, कुलाधिपतिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः | अध्यक्षः |
| २. | प्रो. वेम्पटि कुटुम्बशास्त्री, कुलपतिचरः आ.इ.एस.एस. अध्यक्षः च | सदस्यः |
| ३. | डॉ. रामदोरई, अध्यक्षः, राष्ट्रीयकौशलविकासनिगमस्य सदस्यः, | सदस्यः |
| ४. | डॉ. बिबेक देबरायः, अर्थशास्त्री, सदस्यश्च, नीति-आयोगः | सदस्यः |
| ५. | श्री वी.वी.भट्टः, आई.ए.एस. (सेवानिवृत्तः) सचिवचरः, भारतसर्वकारः | सदस्यः |
| ६. | डॉ. एच.आर.नागेन्द्रः, कुलपतिः, एस.व्यास, अध्यक्षश्च, आयुष-कार्यदलम् | सदस्यः |
| ७. | प्रो. वेदप्रकाशः, अध्यक्षः, विश्वविद्यालयानुदानायोगः | सदस्यः |
| ८. | डॉ. अनिल सहस्रबुद्धे, अध्यक्षः, ए.आई.सी.टी.ई. | सदस्यः |
| ९. | प्रो.परमेश्वरनारायणशास्त्री, कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम् | सदस्यः |
| १०. | श्री चमू कृष्णशास्त्री, वरिष्ठपरमर्शदाता, भाषाविभागः, मानवसंसाधनविकासमन्त्रालयः, भारतशासनम् | सदस्यः |
| ११. | प्रो. रा.देवनाथः, कुलपतिचरः, जे.आर्.आर्.एस.यु. राजस्थानम्, प्राचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, श्रीरणवीरपरिसरः, जम्मू | सदस्यः |
| १२. | प्रो.श्रीनिवासवरखेडी, कर्णाटकसंस्कृतविश्वविद्यालयः | सदस्यः |
| १३. | प्रो. रमेशभरद्वाजः, विभागाध्यक्षः, दिल्लीविश्वविद्यालयः | सदस्यः |

एते अस्यां समितौ आसन्। समितिरियं १८.११.२०१५ दिनाङ्के मानवसंसाधनविकासमन्त्रालयाय दीर्घावधिपरिकल्पना एवं क्रियाविधिः (Vision and road map) इत्यस्य प्रतिवेदनं समार्पिपत्। तत्रोधृताः केचन बिन्दवः–

### परिकल्पना (Vision)

आप्राचीनकालात् भारतीयभाषाभिः सह स्वतन्त्ररूपेण विकसितेयं संस्कृतभाषा भारतस्य एकताखण्डतासंपादनाय महत्त्वपूर्णं स्थानम् अबिभः। अस्याः अधिकपोषणस्य अपेक्षा च अस्ति।

भारतस्य प्रत्यनूकं संस्कृतसाहित्यस्य योगदानं विद्यते, अत एव संस्कृतस्य सार्वजनीनताया प्रबलकरणस्य च अनिवार्यता अस्ति।

संस्कृतस्य विकासः न केवलम् अनिवार्यतया सेत्स्यति अपि तु संविधानस्य अष्टमानुसूच्यां सम्मिलिताभिः भाषाभिः सह प्रतिस्तरं वैकल्पिकविषयरूपेण भवेत्। अनिवार्यता क्वचित् भाषाभिवृद्धये बाधिका स्यात्। अधुना छात्रवर्गः विकल्पचयने सक्षमः।

संस्कृतं विज्ञान-प्रोद्योगिकी-गणितायुर्विज्ञान-विध्यर्थशास्त्रादीनां भाषया सहैव प्रयोगशालभाषा अप्यस्ति। किन्त्वधुना देवालयभाषा संजाता। पूजनस्यापेक्षया भाषायां विद्यमानवैशिष्ट्यं जानीयात्। न सांवेगिक्या बुद्ध्या किन्तु विवेकेन विमर्शयेत्। महर्षिः अरविन्दः उवाच-वेदः चिन्तनस्य विषयोस्ति, सर्वधर्मसमन्वयसंस्कृतभाषायां शोधस्य प्रयोगस्य च अपेक्षा विद्यते। संस्कृतस्य उपयोगदृष्ट्या मूल्याङ्कनं कुर्यात्। अपेक्षितः अर्वाचीनाधुनिकविषयसमन्वयसेतुः पूर्वपश्चिमयोः समस्तोत्तमचिन्तनसमन्वयः च।

**पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।**
**सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः।।** (मालविकाग्निमित्रम् १-२)

(प्राचीनमिति कारणेन सर्वोपि विषयः योग्यो न भवति, अपि च नूतनः इति कारणेन निन्द्योपि न। विवेकिनः परीक्ष्य योग्यायोग्ययोः निर्धारणं कुर्वन्ति। मूर्खो हि परवचनं विश्वसिति।)

महात्मागान्धीमहोदयः पुत्रेभ्यः लिखितेषु नैकेषु पत्रेषु संस्कृताध्ययनस्य महत्त्वम् उल्लिखितवान्। विना संस्कृताध्ययनं भारतीयशिक्षा अपूर्णा इति अस्य विचारः आसीत्। स्वामीविवेकानन्दमहोदयोपि संमाननीयेभ्यःजनेभ्यः स्वशिष्येभ्यः च लिखितेषु पत्रेषु संस्कृताध्ययनस्य महत्त्वम् अवश्यकतां च प्रतिपादितवान्। महात्मागान्धी-स्वामीविवेकानन्दयोः परिकल्पनां फलप्रदां कर्तुं यथाशक्ति प्रयतनीयम्।

मुख्यालयवार्ता

श्री नजरुद्दीन अहमदादिमहोदयैः सह डॉ. भीमराव अम्बेडकरमहोदयोपि संस्कृतभाषां राजभाषात्वेन उद्घोषणीयमिति प्रारूपसंशोधनाप्रस्तावे हस्ताक्षरं च अकरोत्। अयं प्रस्तावः संविधानसभायां यदा प्रस्तुतः तदा डॉ. अम्बेडकरमहोदयः पण्डित लक्ष्मीकान्त मैत्रामहोदयश्च संभाषणद्वारा संस्कृतभाषायाः सारल्यम् अक्षिसात् अकारयत्। डॉ. अम्बेडकरमहोदयेन उक्तानुसारम् अधुना तादृशकालः संप्राप्तः अस्ति भारतस्य प्रतिच्छात्रं संस्कृतसंभाषणं शिक्षयेत्।

संस्कृतशिक्षणपद्धतौ परिवर्तनस्य अपेक्षा अस्ति। संस्कृतमाध्यमेनैव संस्कृतशिक्षणप्रदानाय अध्यापकानां प्रशिक्षणम् अपेक्षितम्। अतःभाषाशिक्षणस्य आधुनिकशिक्षणपद्धत्यानुगुणम् अध्यापकानां प्रशिक्षणम् अध्यापनसामग्रीनिर्माणं च अग्रिमेषु त्रिचतुरेषु वर्षेषु अधिकरूपेण भवेत्। प्रथमचरणे चितेषु विद्यालयेषु प्रतिराज्यम् अग्रणी-परियोजना (Pilot Projects) संचालिता स्यात्। द्वितीये चरणे सर्वेषु विद्यालयेषु षट्सप्तानां वर्षाणाम् अन्तरालं नूत्नायाः पद्धतेः नवीनपाठ्यपुस्तकानां च समावेशो भवितुमर्हति।

समितेः अस्याः संस्तुतेः क्रियान्वयनाय सर्वाः संस्कृतसंस्थाः विभिन्नविभागाश्च शैक्षिकक्रियाकलापानां पुनर्निर्धारणम् अग्रिमेषु दशसु वर्षेषु कुर्युः। अपि च षट्सु मासेषु न्यूनातिन्यूनं सकृत् कार्यप्रगतेः अनुवीक्षणा व्यवस्था (Monitoring System) स्यात्।

आगामिषु दशसु वर्षेषु एषां प्रयासानां फलस्वरूपम् इदं भवेत् १). प्रत्येकं संस्कृतच्छात्रः सरलसंस्कृतसंभाषणे दक्षः स्यात् उत्तरमपि संस्कृते लिखेत्, २). विज्ञानम्, समाजविज्ञानम्, अर्थशास्त्रम्, गणितम् इत्यादीनां संस्कृताधुनिकविषयाणां परस्परं सामैक्यं स्यात्, ३). संस्कृते शोधस्य नवीनं मुखम् उद्घाटितं भवेत्, ४). संस्कृते मौलिकलेखनरूपेण अनूदितरूपेण वा सर्वेषां विषयाणां ज्ञानप्रधानसाहित्यकोषस्य उपलब्धिः स्यात्, ५). संस्कृतं शिक्षायाः अन्येषु स्थानेषु यथोचितं सम्मानं विन्देत्।

## संस्कृतस्य विकासाय योजनानां संस्तुतिः

### क ) वर्तमानयोजनाः

भारतसर्वकारः विगतेभ्यः त्रिशतेभ्यः वर्षेभ्यः नोडल एजन्सि नवदेहलीस्थेन राष्ट्रियसंस्कृतसंस्थानेन विभिन्नयोजनानां क्रियान्वितिः जायामाना अस्ति। अनया समित्यापि अमूषां योजनानां समर्थनं क्रियते तथा च आसां योजनानां सुचारुरूपेण संचालनमपि अनुमन्यते। समितिः अभिलषते यत् आसां योजनानाम् अधिकसार्थकतां प्रभावपूर्णतां च विधातुम् अधोलिखिताः प्रयासाः अपेक्षिताः–

१. आसां योजनानां पारिश्रमिकं उपबन्धः अस्ति, तत्र ५० प्रतिशततः १०० प्रतिशतं यावत् वृद्धिः भवति, किन्तु योजनारम्भात् यत् पारिश्रमिकं संस्तुतम् आसीत् तत् १). पारिश्रमिकं योजनारम्भादेव अत्यल्पम् आसीत्। २). बहुभ्यः वर्षेभ्यः तस्य संशोधनं न जातम्, ३). अन्ययोजनानां तुलनायाम् पारिश्रमिकं अत्यल्पम्, ४). योजनायां समयस्य अनुबन्धस्य च परिवर्तनम् अपेक्षितम्।

२. आसां योजनानाम् अन्तर्गतं मानवसंसाधनस्य उपलब्धिं कारयितुं शक्यते तत्सम्बन्धे इयं संस्तुतिः–

अ) यदि योजना अध्यापनपदस्य संबद्धं तर्हि केन्द्रीयविद्यालयस्य स्तरे दीयमानस्य वेतनस्य अन्यव्ययस्य (D.A.) च अनुरूपं योजनान्तर्गतेभ्यः अपि दातुं निश्चयं कुर्यात्।

ब) यदि पदं महाविद्यालयस्तरस्य स्यात् तदा अनुबन्धितरूपेण अध्यापकस्य नियुक्तेः निर्धारणं कुर्यात्।

३. मूलभूतसंरचनायाः कृते संबद्धस्य अनुदानस्य विषयः स्यात् तदा अनुदाने ५० प्रतिशतं वृद्धिः भवेत्।

४. यदि राज्ये संस्तुतिसंबद्धः प्राधिकारः नहि स्यात् तदा अन्यप्राधिकारेण जनस्य चयनं स्यात्।

५. वित्तीयसहायः तान्त्रिकपरिवर्तनप्रणाली (Electronic Transfer System) माध्यमेन कर्तुं प्रभवति।

६. इदमपि दृष्टं यत् योजनान्तर्गतं राष्ट्रपतिपुरस्कारार्थम् आवेदनपत्राणां स्वीकृतिः विचारः, चितानां सूच्याः समर्पणं च क्रियते। राष्ट्रपतिपुरस्काराय चयनार्थं पुस्तकानां शोधपत्राणां च प्रकाशनं, राष्ट्रियासु अन्ताराष्ट्रियासु संगोष्ठीषु भागग्रहणादीनां मापनं विद्यते। इदं मापनं विश्वविद्यालयस्तरे सेवारतानां विदुषां कृते औचित्यम् आवहति, किन्तु परम्परागतविदुषाम् इदं मापनं समीचीनं न, तेषामपि योजनायाम् अन्तर्भावः मुख्यं ध्येयम् अस्ति। अतः पारम्परिकसंस्कृतविदुषां वेदपाठिनां च पुस्तकादीनां मापनं न स्यात्। किन्तु शास्त्रार्थसभायां वेदसभायां च भागग्रहणं, शास्त्रीयवैदिकविषयाध्ययनार्थं विश्रुतपीठेभ्यः विख्यातमठेभ्यः समितिभ्यः च दीयमाना पुरस्कृतिः संस्तुतिश्च मापनरूपेण स्वीकर्तुं शक्यते।

७. प्रदीयमानस्य बादरायणपुरस्कारस्य चयनमापने अप्रकाशितस्य दुर्लभस्य न्यूनातिन्यूनं २०० पृष्ठयुक्तस्य पाण्डुलिपिग्रन्थस्य महत्त्वविषये समालोचनात्मकटिप्पणीसहितं संपादनं प्रकाशनं च मुख्यबिन्दुः स्यात्। अनेन अप्राप्तज्ञानभाण्डागारस्य प्रकाशने अपेक्षितं साफल्यं लभ्यते।

मु ख्या ल य वा र्ता

**ख) संस्कृतस्य विकासाय प्रस्तुताः नवीनयोजनाः**

**१) स्वतन्त्रात् पूर्वं स्थापितानां संस्कृतविद्यालयानां पुनरुद्धारः।**

१. इदानीं कार्यरता नैके विद्यालयाः स्वतन्त्रात् पूर्वं स्थापिताः, किन्तु अपेक्षितसामग्र्यभावेन जीर्णाः शीर्णाः च, तेषाम् उद्धारः भवेत्।

२. महाविद्यालयानां शोधसंस्थानाम् अभिज्ञात्यर्थं समितेः आरचनम्।

३. गुणात्मकशिक्षायाः प्रोन्नतिः।

४. शास्त्रपरम्परागतविद्वद्भ्यः लाभस्य आपूर्तिः।

५. विशुद्धशास्त्रीयपरम्परायाः रक्षणम्।

६. एवं महाविद्यालयेभ्यः शोधसंस्थाभ्यश्च पञ्चवर्षाणां कृते समुचितपारिश्रमिकसहितं मानवसंसाधनस्य आपूर्तिं कर्तुं शक्यते, यदि तासां संस्थानां शैक्षिकमूल्याङ्कनं समुचितं तर्हि आपूर्तेः परिवर्धनं भवेत्।

**२) पाठशालानां कृते साहाय्यम्**

अस्याः योजनाया अन्तर्गतम् ऐककालिकम् अनुदानं दद्यात्, तेन विषमपरिष्ठितौ अपि स्थातुं शक्नुयात्। प्रदत्तानुदानं संरचनायै शैक्षिकविकासाय च व्ययं कुर्यात्।

**३) पाण्डुलिपिपुस्तकालयस्य प्राच्यशोधसंस्थायाः च कृते आश्वासनम्**

विलुप्तप्रायाणां पाण्डुलिपिपुस्तकालयानां प्राच्यशोधसंस्थानां च पुनरुद्धाराय ग्रन्थालयकर्मचारिणां पारिश्रमिकं दातुम् अनुदानस्य उपलब्धिः स्यात्। पाण्डुलिपीनां वैद्युतीकरणम् इत्यादिकार्याय मानवसंसाधानस्य अवश्यकता अस्ति। प्रदर्शनकौशलनियमानुगुणम् अन्याभ्यः बाह्यसञ्चिकाभ्यः मानवसंसाधनस्य आपूर्तिः भवितुमर्हति।

**४) शास्त्रसंरक्षणयोजना**

अनया योजनया शास्त्रशिक्षणपरिरक्षणाय पारम्परिकशास्त्रविदुषां सदुपयोगः भवति। इयं परियोजना मार्गद्वयेन क्रियान्वितिः भवितुमर्हति। १. औपचारिकशिक्षाप्रणालीद्वारा, २. अनौपचारिकशिक्षाप्रणालीद्वारा च।

**क) औपचारिकशास्त्रशिक्षाधिगमप्रणाली**

अनया योजनया आचार्यकक्षाधिगतानन्तरमपि शास्त्राध्ययनपरिपाट्याः अनुरक्षणं भवति। विभिन्नशास्त्रग्रन्थानां गुरुमुखात् वर्षत्रयम् अध्ययनं कर्तुं प्रभवति। अवश्यानुगुणम् औपचारिकोपाधिमपि दातुं शक्यते। प्रत्येकं विशेषज्ञाय गुरवे समुचितं पारिश्रमिकं दीयते, अपि च प्रत्येकं शिक्षार्थिभ्योपि यथायोग्यं छात्रवृत्तिः दीयते। संस्कृतसंस्थासु निर्धारितपाठ्यक्रमम् अतिरिच्य ग्रन्थांशाः योजनायामस्यां पाठ्यन्ते तद्यथा महाभाष्यस्य नवाह्निकात् परं विद्यमानमहाभाष्यस्य अध्ययनम्, सिंहलक्षणस्य व्याघ्रलक्षणस्य च अध्ययनम्, मीमांसाशास्त्रस्य द्वादशाध्यायानां पठनम्, श्रौतग्रन्थानाम् अध्ययनमपि अत्र अन्तर्भवति।

**ख) अनौपचारिकशास्त्रशिक्षाधिगमप्रणाली**

अस्यां योजनधारायां गुरुकुलप्रणाल्याः पुनरुद्धारः क्रियते अपि च पारम्परिकपद्धत्या स्वस्थाने वसतां विदुषाम् अध्यापनसेवा स्वीक्रियते। शास्त्रीयपरम्परायाः रक्षणार्थं ज्ञानविनिमयार्थं च शास्त्राणि अध्याप्यन्ते। विशिष्टस्य एकस्य शास्त्रस्य अध्ययनार्थं पञ्च छात्राः एकस्य गुरोः अधीने नियोज्यन्ते। अधीतशास्त्रीयविद्यानां शलाकादिपरीक्षाद्वारा परीक्षणं क्रियते। प्रत्येकम् अध्यापकाय छात्राय च पारिश्रमिकं छात्रवृत्तिश्च प्रदीयते। अनया योजनया पारम्परिकविद्वत्ता शास्त्राधिगमप्रणाली च संरक्ष्यते। गुरुकुलप्रणाल्याः पुनरुद्धारः शास्त्रस्य रक्षणं च भवेत्। अनया शास्त्राधिगमप्रणाल्या नूतनाध्ययनक्रमद्वारम् उद्घाटितं भवेत्।

**अष्टादशी संस्कृतस्य निरन्तरविकासाय अष्टादश परियोजनाः**

संस्कृतस्य विकासाय अधोङ्कितानाम् अष्टादशपरियोजनानां क्रियान्वयनस्य अवश्यकता अस्ति। सर्वाः परियोजनाः राष्ट्रियसंस्कृतसंस्थानं संचालयितुं प्रभवति अथवा संस्कृतविकाससंबद्धसंस्थाभ्यः सर्वकारप्राधिकारसंस्थाभ्यः (NGO) दातुं शक्यते। योजनायाः क्रियान्वयनाय युवसंस्कृतविद्वांसं सेवानिवृत्तसंस्कृविद्वांसं वा विश्वविद्यालयानुदानायोगेन संविदाध्यापकेभ्यः संस्तुतवेतनानुगुणं संविदाध्यापकं कार्यानुगुणं नियोजयेत्। ज्ञेयं यत् नियुक्तः अध्यापकः दक्षः शुद्धसंस्कृतसंभाषणं च जानीयात्। अपेक्षितकार्यसूची स्पष्टरूपेण निर्धारिता स्यात्। एभिःपरियोजनाभिः उक्तोद्देश्यस्य आपूर्त्या सह संस्कृतस्नातकानां कृते आजीविकायाः सर्जनं भवतीति समित्या निवेद्यते।

**१) ज्ञानात्मकसाहित्यानुवादपरियोजना**

विद्यालयशिक्षातः विश्वविद्यालयशिक्षासंबद्धानि कला-विज्ञान-वाणिज्य-व्यावसायिकादीनि अन्यभाषासु उपलब्धानि यानि ज्ञानसाहित्यानि तानि संस्कृतभाषया अनूद्यन्ते। तथा च वैद्युतमाध्यमेन प्रकाशितं भवेत्।

## २) पाण्डुलिपीनां संपादनं प्रकाशनं च

चतुर्दशविभिन्नलिपिषु लिखिता: ४५लक्षपाण्डुलिपय: ४०००अधिकपुस्तकालयेषु उपलभ्यन्ते। अनुमीयते च प्रकाशितपाण्डुलिपी: अतिरिच्य लक्षाधिका: पाण्डुलिपय: अप्रकाशिता: सन्ति। एता: न केवलं साहित्यदृष्ट्या महत्त्वपूर्णा: किन्तु वर्तमानसंन्दर्भे शोधविषयेपि उपयोगिन्य: सन्ति। अत: एतासां पाण्डुलिपीनां संपादनपूर्वकं प्रकाशनं कुर्यात्। पाण्डिलिपिसंपादनाभिज्ञस्य संस्कृताभिज्ञस्य च विदुष: प्राप्त्यर्थं यथासंभवं संस्कृतसंस्थासु पाण्डुलिपिसंपादनप्रशिक्षणकार्यक्रम: संचालित: भवेत्।

## ३) डिजिटल एवं ऑन-लाईन-परियोजना

सर्वासां संस्कृतकृतीनां डिजिटलरूपेण रूपान्तरणं कृत्वा अन्तर्जाले संस्थापयेत्। अथ तासां कृतीनाम् अन्तर्जाले उपलब्धि: स्यात्। एतदतिरिच्य भिन्नपाठ्यक्रमाणां यथा प्रारम्भिकपाठ्यक्रमस्य, माध्यमिकपाठ्यक्रमस्य, स्नातकपाठ्यक्रमस्य स्नातकोत्तरपाठ्यक्रमस्य, भाषापाठ्यक्रमस्य विभिन्नशास्त्रकाव्याधारितपाठ्यक्रमस्य च विकास: स्यात्। एवं रीत्या नैके पाठ्यक्रमान् अभिवर्धयितुं शक्यते। एतेषाम् उपलब्धि: संपूर्णे विश्वे न केवलं संस्कृताध्ययने अभिरुचियुक्तानां जनानाम् अपि तु सम्पेषणप्रौद्योगिक (ICT) कक्षाध्यापकोपि प्रयोगे अन्तर्भवितुमर्हति।

## ४) ग्रीष्मकालिकपाठ्यक्रमयोजना:

नैके जना: संस्कृतव्याकरणं भिन्नशास्त्राणि संस्कृतरचनानि च अध्येतुं वाञ्छन्ति। संस्कृताध्यापका: संस्कृतच्छात्राश्च अन्यं विषयं पठितुम् अभिलषन्ति। अवश्यानुगुणं ग्रीष्मावकाशे उल्लिखितविषयेषु भिन्नपाठ्यक्रमनिर्माणं कर्तुं शक्यते। ग्रीष्मकालिकपाठ्यक्रमविषये प्रत्येकं संस्कृतविश्वविद्यालय: भिन्नपाठ्यक्रमविषयं निर्धारयितुं प्रभवति। अनेन ग्रीष्मकालिकपाठ्यक्रमे भागग्रहणाय अध्यापकानां छात्राणां च सौविध्यं स्यात्।

## ५) समकालिकसाहित्यपरियोजना

भाषाया: साहित्ये तत्समकालिकसमाजस्य विमर्शस्य चिन्तनस्य प्रतिबिम्बम् अपेक्षितम्। एतदेव जीवितभाषाया: मानदण्ड: भवति। यद्यपि संस्कृतभाषायां समालिकविषयपुस्तकानां प्रकाशनं जायमानम् अस्ति तथापि अस्मिन् विषये अधिककार्यस्य अपेक्षा विद्यते। अत: अनया परियोजनया समकालिकविषयस्य लेखनाय विदुष: प्रोत्साहयेत्। संस्कृते लेखनाय प्रकाशनाय च उदारेण अनुदानं दीयेत।

## ६) सन्ध्याकालिकविद्यालयपरियोजना

नियतच्छात्रा: अध्ययनपाठ्यक्रमेण सह अभिरुच्यनुगुणम् अन्यपाठ्यक्रमान् अपि सन्ध्याकालिककक्षामाध्यमेन पाठयितुं शक्यते। ये विद्यालये संस्कृतं नाधीतवन्त: तेपि अन्यकार्यं कुर्वन्त: सन्ध्याकालिककक्षासु पठितुं प्रभवन्ति। उद्दीप्तावश्यकताया: न्यूनातिन्यूनं महानगरेषु संस्कृतसंन्ध्याविद्यालयेन सन्ध्यामहाविद्यालयेन पूर्ति: स्यात्। अनेन संस्कृतशिक्षणस्यापि वेग: वर्धते।

## ७) प्रौद्योगिकस्वीकृतिपरियोजना

संस्कृतप्रयोगसंबन्धिनीनां समुचितवर्णलेख: (Font), एप्स, ओ.सी.आर्. सॉफ्टवेर, वर्चु वलकक्षा: अन्वेषणी (Search) परीक्षाणां ऑन-लाईन प्रबन्धनम् इत्यादीनां प्रौद्योगिकसमस्यानां निवारणं जायमानम् अस्ति, तथापि नवीनप्रौद्योगिकसम्बद्धप्रणालीसंवर्धनम् अनिवीर्यं विद्यते। संस्कृतविकासाय नूतनप्रौद्योगिक्या: स्वीकृतिरपि अनिवार्या। अत: निरन्तरं संवर्धमानप्रौद्योगिकक्षेत्रे संस्कृतस्य नैरन्तर्यम् अपेक्षितमस्ति।

## ८) संगणकशिक्षापरियोजना

इदं निश्चितं यत् संस्कृतं सर्वाधिकस्वाभविकानुकूलभाषा विद्यते किन्तु महान् विच्छेद: संगणकप्रयोगसंस्कृतभाषयोर्मध्ये। प्रौद्योगिकक्षेत्रे संस्कृतस्य पृष्ठगमनस्य इदमपि कारणमस्ति। अत: संस्कृताध्यापकानां छात्राणां कृते संगणकशिक्षाप्रदानाय राष्ट्रिय-उर्दूप्रोत्साहन-परिषद्-द्वारा अथवा नूतनप्रशिक्षणकेन्द्रम् उद्घाटयितुं शक्यते। प्रशिक्षणाय संगणकक्षेत्रे अभिरुचियुक्तस्य संस्कृतानुदेशकस्य नियोजनेन अधिक: प्रभाव: स्यात्।

## ९) द्वैवार्षिकसंस्कृतपुस्तकमेलापरियोजना

२०११तमे बेङ्गलूरुनगरे चतुर्दीवसीय-विश्वसंस्कृत पुस्तकमेला समायोजिता आसीत्। १५४ प्रकाशका: भागम् ऊढवन्त:। अस्यां मेलायां चतुर्लक्षमिता: जना: समवेता: चतुर्लक्षरूप्यकाणां पुस्ताकनां विक्रयणं च जातम् आसीत्। अयं कश्चन नवीन: अनन्यश्च प्रयोग: अभवत्। तत:प्रभृति जनताया: विद्यालयप्रबन्धकानां च अपेक्षा अस्ति यत् एतादृश्य: मेला: प्रतिराज्यं राजधान्याम् आयोजनीया यतोहि संस्कृतपुस्तकानां सर्वत्र उपलब्धि: नास्ति। अपेक्षितपुस्तकानि अनुमातुं शक्यते इति संस्कृतपुस्तकप्रकाशकानां निवेदनं विद्यते। कस्मिंश्चित् राज्यस्य राजधान्यां वर्षद्वयस्य अन्तराले संस्कृतस्वयंसेविसंघसहयोगेन संस्कृतपुस्तकमेला आयोजयेत्।

मुख्यालयवार्ता

### १० ) कार्यक्रमप्रसारपरियोजना

संस्कृतविद्यालयेषु विश्वविद्यालयेषु च छात्रसंख्यावर्धनाय तत्तद्विद्यालयेषु महाविद्यालयेषु च अल्पकालिकपाठ्यक्रमसंचालनाय प्रेरयितुं शक्यते। संस्कृतसंबद्धपाठ्यक्रमसंचालनाय मानवसंसाधनस्य सहयोगः दीयते, तेन भिन्नभिन्नस्थानेषु पाठ्यक्रमं चालयितुं शक्यते। तस्मिन् क्षेत्रे विद्यमानेषु विद्यालयेषु महाविद्यालयेषु संस्कृतस्य लोकप्रियता वर्धेत।

### ११ ) शब्दशालापरियोजना

दैनन्दिनव्यवहाराय आधुनिकविषयसंप्रेषणाय लेखनाय च संस्कृतभाषाप्रयोगः क्रियते तथापि संस्कृते आधुनिकशब्दानां न्यूनता अस्त्येव। सी.एस्.एस्.टि. द्वारा आकलितेषु शब्देषु सर्वे शब्दाः संस्कृते न सन्ति। संस्कृते असंख्याकानां शब्दानां निर्माणसामर्थ्यं अस्ति किन्तु न कयाचित् संस्थया न केनचन विदुषा समुचितप्रयासः न विहितः। इदमपि आवश्यकं यत् नवनिर्मितशब्दानां देशे स्वीकारः स्यात् सरलसंस्कृते च भवेत्। एवं प्रकारेण भिन्नवर्गाणाम् अन्तर्गतं चिह्नितकार्याणि संस्कृतविश्वविद्यालयेभ्यः संस्कृतसंस्थाभ्यः दातुं शक्यते। प्रत्येकं संस्था भिन्नभिन्नमातृभाषायाः विद्वांसं नियोजयेत् तेन बहुभाषाप्रक्रियाधारेण निर्मितः शब्दः देशे स्वीकार्यः स्यात्।

### १२ ) दुर्लभपुस्तकानां पुनः प्रकाशनपरियोजना

स्वतन्त्रतायाः पूर्वं निर्णयसागरप्रेस-इत्याद्यः नैकाः प्राच्यशोधसंस्थाः संस्कृतस्य महत्त्वपूर्णम् अमूल्यग्रन्थं शुद्धरूपेण मुद्रयन्ति स्म। अधुना अधिकांशग्रन्थाः न उपलभ्यन्ते। आधुनिकपरिस्थितौ तेषां सविधे पुनर्मुद्रणाय पर्याप्तार्थिकसंसाधनस्य उपलब्धिः नास्ति। अतः राष्ट्रियसंस्कृतसंस्थानात् सर्वकारवित्तीयसहायतासंपन्नसंस्थातः मानवसंसाधनविकासमन्त्रालयतः वा वित्तीयसहायं प्राप्य दुर्लभपुस्तकानां पुनर्मुद्रणं भवेत्। दीर्घकालिकसंरक्षणाय वैद्युतीकरणं च कुर्यात्।

### १३ ) आवासीयप्रशिक्षणपरियोजना

यां भाषाम् अध्येतुमिच्छति तां भाषां तस्याःभाषायाः वातावरणे एव अध्यापयेत्। तदैव शिक्षार्थी भाषायाः चतुर्मुखकौशलं स्वाभाविकरूपेण प्राप्तुं शक्नोति। कुशलाध्यापकानाम् उपलब्धये सर्वेषु राज्येषु अध्यापकेभ्यः छात्रेभ्यः स्वयम्सेविजनेभ्यः भिन्नभिन्नस्तरेषु भिन्नभिन्नसमये प्रशिक्षणशिबिरस्य आयोजनं भवेत्।

### १४ ) संस्कृताधुनिकविषयाणां सामैक्यपरियोजना

संस्कृताधुनिकयोः विषययोः ज्ञातारः विद्वांसः अत्यल्पाः सन्ति। अस्य एकमेव समाधानं संस्कृतविद्वांसः आधुनिकविषयं पठेयुः आहोस्वित् आधुनिकविषयविद्वांसः संस्कृतं पठेयुः। कश्चन एकस्याः ज्ञानशाखायाः अध्ययनं समाप्य अन्यज्ञानशाखां पिपठिषति तादृशस्य स्नातकस्नातकोत्तरजनस्य कृते अध्येतृवृत्ति (Fellowship) व्यवस्था कल्पनीया।

### १५ ) आन्तरिकसहायकपरियोजना

आई.आई.टि., एन्.आई.आई.टि., अथवा एसी.आई.टी.ईद्वारा अनुमोदिततान्त्रिकमहाविद्यालयस्य छात्राणां कृते एतदृशपरियोजना स्यात्, यतः अध्ययनकाले कस्याश्चित् संस्कृतसंस्थायाः कस्यचन आचार्यस्य अधीने सांस्थानिकप्रशिक्षणस्य चयनं कुर्वन्ति, अपि च तेभ्यः संपुटः (Credits) उपलभ्यते। तेभ्यः छात्रेभ्यः क्वचित् वित्तीयसहायः स्यात् तदा संस्कृतसाहित्ये अन्तर्निहितज्ञानप्रकाशने तेषां कौशलस्यापि उपयोगः भवेत्। यद्यपि परियोजना लघुस्तरे भवति, अपि च संस्कृतसंस्थायाः संस्कृतविदुषः लक्षितः प्रायसः विद्यते।

### १६ ) बालसाहित्यपरियोजना

बाल्यावस्थायाम् एव भाषायाः संभाषणम् अध्ययनं च स्यात्। अधुना बालसाहित्यम् अन्यासु भाषासु विविधवर्णीयानि पुस्तकानि, फलकानि, सान्द्रमुद्रिकाः, गीतानि, व्यङ्ग्यचित्राणि, चलनचित्राणि, डोक्युमेण्टरी, व्यङ्ग्यचित्रपुस्तकानि, अमरचित्रकथाएप्स, इत्यादीनि प्राचुर्येण उपलभ्यन्ते। सहस्राधिकदूरदर्शनचानल्स वेब्-पोर्टलादीनि अधिकतया बालसम्बद्धान् कार्यक्रमान् प्रसारयन्ति। संस्कृतस्यापि एतादृशबालसाहित्यप्रणाल्यां भागग्रहणं भवेत्।

### १७ ) संस्कृतमाध्यमेन योगपरियोजना

संस्कृतसाहित्यस्य उत्तमयोगदानं विद्यते योगः। अतः संस्कृतमाध्यमेन योगस्य, योगमाध्यमेन संस्कृतस्य अध्ययनाय केन्द्राणि स्थापनीयानि। योगसंबद्धग्रन्थान् संस्कृतमाध्यमेन अध्येतुं बहवः इच्छन्ति। अतः ओ.एन्.जी.सी. सी.एस्.आर् इत्यस्य वित्तीयसहायेन संस्कृतप्रोत्साहनन्यासः (S.P.F.) एतादृशपाठ्यक्रमस्य अध्यापनाधिगमशिक्षणसामग्रीणां निर्माणं कुर्वाणः विद्यते। प्रस्तावितकेन्द्राणि एतत्सामग्रीणाम् उपयोगं कर्तुं शक्नुवन्ति अथ च योगसंस्कृतविज्ञं केन्द्राणि नियोजयितुं प्रभवति।

### १८ ) संस्कृतमाध्यमेन आयुर्वेदपरियोजना

आयुर्वेदस्य भाषा एव संस्कृतं विद्यते। स्वस्थजीवनाय सर्वे आयुर्वेदस्य अध्ययनं कुर्युः। संस्कृतमाध्यमेन आयुर्वेदकक्षाणां संचालनस्य अपेक्षा वर्धते एव। आसां कक्षाणाम् उद्देश्यं न तु वैद्यस्य निर्माणं किन्तु सकारात्मकमनोमस्तिष्कस्य निर्माणं विद्यते।

**मुख्यालयवार्ता**

## षोडशं विश्वसंस्कृतसम्मेलनम्

षोडशं विश्वसंस्कृतसम्मेलनं थाईलैण्डदेशस्य ब्याङ्काक्-नगरे सुचारुतया २८.०६.२०१५ त: ०२.०७.२०१५ पर्यन्तं सम्पन्नम्। ६० देशेभ्य: आगता: ६४२ प्रतिनिधय: तत्र भागम् ऊढवन्त:। राष्ट्रियसंस्कृतसंस्थानेन सम्मेलनाय उपपञ्चविंशानां विदुषां प्रतिनिधिमण्डलं नीतम्। उद्घाटनसमारोहे भारतसर्वकारस्य विदेशाङ्गमन्त्रिणी श्रीमती सुषमास्वराजवर्या, सयाम् बरोम् राजकुमारी महाचक्रीसिरिन्धोन्-महाभागा च उपस्थिता आसीत्। अस्य समवायस्य ध्येयवाक्यं वसुधैव कुटुम्बकम्, इयं सूक्ति: अयं मामक:, अयमन्य: इति भावं निवारयति वयम् एकस्य कुटुम्बस्य सदस्या इति भावं जागरयति। भाषेयमतिशुद्धा ज्ञानविज्ञाननिकर: अस्ति। तथापि स्तुतिमात्रेण किमपि न साधयाम:। अनुदिनव्यवहारे संस्कृतभाषा अपेक्षिता अस्ति तदैव संस्कृतभाषासुगन्ध: सर्वत्र प्रसरति इति श्रीमती सुषमास्वराजवर्या अवदत्।

पञ्चसु दिनेषु प्रवृत्ते सम्मेलने वेद:, वेदसाहित्यम्, रामायणम्, महाभारतम्, पुराणम्, आगम:, तन्त्रम्, भाषाविज्ञानम्, व्याकरणम्, काव्यसाहित्यम्, नाटकसाहित्यम्, बौद्धसाहित्यम्, जैनसाहित्यम्, दर्शनम्, इतिहास: कलासाहित्यम्, योगशास्त्रम्, आयुर्वेद:, हस्तलेखनशास्त्रम्, नाट्यशास्त्रम्, वेदगणितम्, दूरस्थशिक्षा इत्यादिविषयमवलम्ब्य ८०० अधिकानि शोधपत्राणि भारतीयविद्वद्भि: पाश्चात्यविद्वद्भि: च नैकेषु सत्रेषु प्रस्तुतानि।

विश्वसंस्कृतसम्मेलने बेङ्गलूरुस्थ-स्वामी विवेकानन्दयोगानुसंधान- संस्थाया: कुलपते: डॉ. जि.रामचन्द्रभट्टवर्यस्य आध्वर्यवे परम्परापद्धत्या शब्दार्थसंबन्धविमर्श: प्रमाणमीमांसा इति विषयद्वयमवलम्ब्य विद्वद्भि: शास्त्रचर्चा विहिता। शास्त्ररक्षणस्य जीवातुभूताया: शास्त्रचर्चाया: महत्त्वं पाश्चात्यविद्वांस: विज्ञातवन्त:। उज्जैनीस्थमहर्षिपाणि- निसंस्कृतवैदिकविश्वविद्यालयस्य कुलपतिचरस्य आचार्यस्य मिथिलाप्रसादत्रिपाठिवर्यस्य आध्यक्षे कविसमवाय: संपन्न:। विश्वविश्रुतकवय: स्वरचितकवितां श्रावितवन्त:। राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन प्रकाशितानां पुस्तकानां प्रदर्शिनी मुक्तस्वाध्यायपीठनिदेशकानां प्रो. रमाकान्तपाण्डेयवर्यस्य निर्देशने संजाता।

संपूर्तिसमारोहे अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य अध्यक्ष: प्रो. वेम्पटि कुटुम्ब-शास्त्रिवर्य: सम्मेलनाध्यक्ष: डॉ. चिरापत्प्रपण्डविद्यवर्य: राष्ट्रियसंस्कृतसंस्थानस्य कुलपति: प्रो. परमेश्वरनारायणशास्त्रिमहोदय: च मञ्चासीन: आसीत्। अन्ताराष्ट्रियसंस्कृताध्ययन-समवायस्य अध्यक्ष: प्रो. वेम्पटि कुटुम्बशास्त्रिवर्य: अवदत् यत् अस्मिन् सम्मेलने युवान: विद्वांस: विधिवत् शास्त्रचर्चां विदधु:। अत: अग्रिमेषु सम्मेलनेषु पञ्चसु दिनेष्वपि शास्त्रचर्चा आयोजनीयेति। परिसरस्य योगस्य आयुर्वेदविज्ञानस्य विश्वशान्ते: च विषये अस्माभि: अनुसंधानं विधेयमिति राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिना प्रो. परमेश्वरनारायणशास्त्रिमहोदयेन औच्यत।



विश्वसंस्कृतसम्मेलनस्य उद्घाटनाय समागच्छन्ती श्रीमती सुषमास्वराजवर्या



विश्वसंस्कृतसम्मेलने मञ्चे विराजमान: अतिथिगण:




विश्वसंस्कृतसम्मेलने विराजमाना सयाम् बरोम् राजकुमारी महाचक्रीसिरिन्धोन्



विदुषां शास्त्रचर्चाया: एकं दृश्यम्



सांस्कृतिककार्यक्रमस्य एकं चित्रम्



सम्मेलने विराजमान: पाश्चात्यभारतीयविद्वांस:

## संपन्नः पञ्चमदीक्षान्तसमारोहः

राष्ट्रियसंस्कृतसंस्थानस्य पञ्चमदीक्षान्तसमारोहः ३०.०९.२०१५ दिनाङ्के जवाहरलाल-नेहरूक्रीडाप्राङ्गणस्य भारोत्तालनप्रेक्षागृहे अभवत्। समारोहेऽस्मिन् भारतशासनस्य मानवसंसाधन-विकासमन्त्रालयमन्त्रिण्यः राष्ट्रियसंस्कृतसंस्थानस्य कुलाध्यक्षाः श्रीमत्यः स्मृति जुबिन ईरानी-महोदयाः आध्यक्षम् अवाक्षुः। हिमाचलप्रदेशविश्वविद्यालयस्य कुलपतयः प्रो.अरुणदिवाकरनाथ-वाजपेयीमहोदयाः दीक्षान्तभाषणं व्यदधुः। संस्कृतभाषा सर्वभाषाजननी विद्यते। अस्यां भाषायाम् ऋषीणां तपोबलेन उपलब्धः ज्ञानराशिः विलसति। वेदाः पुराणानि शास्त्राणि च सर्वसमत्वभावं विश्वशान्तिभावनां च उपदिशन्ति। विश्वं भवत्येकनीडम्, मा गृधः कस्यस्विद्धनम्, सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग् भवेत् इति वेदः निगदति इति दीक्षान्तभाषणे अवदन्। ऋषीणां ज्ञानवृद्धानां निरन्तरतपसा अस्माकं ज्ञानराशिः शास्त्रपरम्परा च अद्यापि जीवति। अद्य महत्त्वपूर्णं दिनमस्ति यतः भवन्तः दीक्षां प्राप्य समाजं प्रविशन्ति अतः भवतः अभिनन्दामि। संस्कृतभाषा लोकभाषा आसीत् इति प्रयुक्तानाम् इदं व्याकरणशास्त्रमिति वचनेन ज्ञायते। व्याकरणशास्त्रेण काव्यसाहित्यप्रयोगे प्रयुक्तानाम् अन्वाख्यानं न क्रियते व्यवहारे विद्यमानाःशब्दाःअन्वाख्यायन्ते। भारतस्य राष्ट्रभाषा संस्कृतं भवेदिति संविधाननिर्मातुः बाबासाहेब-अम्बेडकरमहोदयस्य आशयः आसीत्। वैज्ञानिके युगे संस्कृतभाषायां विद्यमानानां नवीनतथ्यानाम् अन्वेषणम् अपेक्षितमस्ति। तदैव वयम् अग्रे सरामः इति भारतशासनस्य मानवसंसाधनविकास-मन्त्रालयमन्त्रिण्यः राष्ट्रियसंस्कृतसंस्थानस्य कुलाध्यक्षाः श्रीमत्यः स्मृति जुबिन ईरानी-महोदयाः प्रावोचन्। दीक्षान्तसमारोहे वेदमर्मज्ञाःश्रीमन्तः हृदयरञ्जनमहाभागाः वेदव्याकरणादिशास्त्रनदीष्णाः श्री एस्.नागराजमहाभागाः च महामहोपाध्याय इति उपाधिना विभूषिताः। समारोहे प्रबन्धनपरिषदः सदस्याः विद्वत्परिषदः सदस्या उपस्थिता आसन्। संस्थानस्य विविधेभ्यः परिसरेभ्यः समागताः छात्राः स्नातकविद्यावारिधिदीक्षां पर्यगृह्णन्।



पञ्चमदीक्षान्तसमारोहम् उद्घाटयन्ती श्रीमती स्मृति जुबिन ईरानी-महोदया




पञ्चमदीक्षान्तसमारोहे कुलपतिः मन्त्रिवर्या च



महामहोपाध्यायोपाधिं संप्रददाना मन्त्रिवर्या



दीक्षान्तभाषणं विदधानः प्रो. ए.डी.एन्. वाजपेयी





स्नातकं विद्यावारिधिं च उपाधिं संगृहाणाः छात्राः

## समाचरितः स्थापनादिवसः

१५.१०.२०१५ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य षट्चत्वारिंशः स्थापनादिवसः महता उत्साहेन मुख्यालये समाचरितः। दीपप्रज्वलनेन सरस्वतीवन्दनया च कार्यक्रमः समारब्धः। कार्यक्रमे मुख्यातिथित्वेन राष्ट्रिय-संस्कृतसंस्थानं, संपूर्णानन्दसंस्कृतविश्वविद्यालयः, सोमनाथसंस्कृतविश्वविद्यालयः इति विश्वविद्यालय-त्रयस्य कुलपतिचरः प्रो. वेम्पटिकुटुम्बशास्त्रिवर्यः, सारस्वतातिथित्वेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः प्रो. अभिराजराजेन्द्रमिश्रवर्यश्च उपस्थितः आसीत्। संस्कृतशिक्षाक्षेत्रे राष्ट्रियसंस्कृतसंस्थानस्य महत्त्वपूर्णयोगदानं विद्यते। अत एव विश्वे संस्थानेन स्वकार्यैः नैकाः ऐतिहासिक्यः उपलब्धयः समार्जिताः इति प्रो. वेम्पटिकुटुम्बशास्त्रिवर्यः समबोधयत्।



दीपप्रज्वालनं कुर्वन् प्रो. अभिराजराजेन्द्रमिश्रवर्यः



सरस्वतीमाल्यार्पणं विदधानः प्रो. वेम्पटिकुटुम्बशास्त्रिवर्यः

# संपन्ना ५३तमी अखिलभारतीयशास्त्रीयस्पर्धा



विजयवैजयन्तीपुरस्कारं प्रयच्छन् अतिथिगणः

शास्त्ररक्षणार्थं राष्ट्रियसंस्कृतसंस्थानेन प्रतिवत्सरम् अखिलभारतीयशास्त्रीयस्पर्धा समायोज्यते। १७.०३.२०१५ तः २०.०३.२०१५ दिनाङ्कं यावत् नवदेहलीस्थ-कृष्णधाममन्दिरे ५३ अखिलभारतीयशास्त्रीयस्पर्धानां समायोजनम् अभवत्। दिनचतुष्टयव्यापिनि कार्यक्रमे देशस्य विविधेभ्यः प्रान्तेभ्यः द्विशताधिका स्पर्धालवः भागम् अगृह्णन्त। अष्टसु विषयेषु भाषणस्पर्धा, अष्टसु शास्त्रेषु शलाकापरीक्षा, कण्ठपाठस्पर्धा, शास्त्रार्थविचारः, समस्यापूर्तिः, अक्षरश्लोकी, च स्पर्धाः प्रावर्तन्त। प्रत्येकं स्पर्धासु विजयिनः प्रथम-द्वितीय-तृतीयपुरस्कारेण स्वर्ण-रजत-कांस्यपदकानि समाप्नुवन्। सर्वस्पर्धासु सर्वाधिकान् अङ्कान् अवाप्य कर्णाटकराज्यस्य स्पर्धालुगणः विजयवैजयन्त्या व्यभूषयत्। सम्पूर्तिसमारोहे महान् विद्वान् प्रो.रामचन्द्रझावर्यः पूर्णप्रज्ञासंशोधनमन्दिरम् इति संस्थाया निदेशकः डॉ. ए.वि.नागसम्पिगेमहाभागः राष्ट्रियसंस्कृतसंस्थानस्य जम्मूस्थ-श्रीरणवीरपरिसरस्य प्राचार्यः प्रो. रामानुजदेवनाथवर्यः च कांस्यरजतस्वर्णपदकप्रदानेन पुरस्कारभाजः छात्रान् अन्वग्रहीत्।

# ५४तमी अखिलभारतीयशास्त्रीयस्पर्धा



उद्घाटनकार्यक्रमस्य किञ्चन् दृश्यम्

राष्ट्रियसंस्कृतसंस्थानेन अधीतविद्यायाः दृढीकरणार्थं शास्त्ररक्षणार्थं च प्रतिवर्षम् अखिल-भारतस्तरे शास्त्रीयस्पर्धा आयोज्यन्ते। ५४तमी अखिलभारतीयशास्त्रीयस्पर्धा तिरुपतिस्थ-श्रीवेङ्कटेश्वरवेदविश्वविद्यालये ३०.१२.२०१५ तः ०२.०१.२०१६ दिनाङ्कं यावत् समायोजिता। कार्यक्रमस्य उद्घाटनं ३०.१२.२०१५ दिनाङ्के संपन्नम्। तत्र मुख्यातिथिपदं तिरुमल-तिरुपति-देवस्थानस्य कार्यनिर्वहणाधिकारी डॉ. डी. साम्बशिवराववर्यः, विशिष्टातिथिपदं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिः आचार्यः हरेकृष्णशतपथिवर्यः सारस्वतातिथिपदं श्रीवेङ्कटेश्वरवेदविश्वविद्यालयस्य कुलपतिः आचार्यः का.ई.देवनाथवर्यः च व्यभूषयन्।

अखिलभारतीयशास्त्रीयस्पर्धासु राज्यस्तरे चिताः २३ राज्येभ्यः समागताः २५० अधिकाः प्रतिभागिनः सम्मिलिता अभूवन्। अष्टसु विषयेषु भाषणस्पर्धाः, अष्टसु शास्त्रेषु शलाकापरीक्षा, कण्ठपाठस्पर्धा, शास्त्रार्थविचारः, समस्यापूर्तिः, अक्षरश्लोकी, वेदपाठस्पर्धा चेत्याहत्य २९स्पर्धाः प्रावर्तन्त। प्रत्येकं स्पर्धासु विजयिनः प्रथम-द्वितीय-तृतीयपुरस्कारेण स्वर्ण-रजत-कांस्यपदकानि समाप्नुवन्। सर्वस्पर्धासु अधिकान् अङ्कान् अवाप्य कर्णाटकराज्यस्य स्पर्धालुगणः विजयवैजयन्त्या व्यभूषयत्।



विजयवैजयन्त्या विभूषितः कर्णाटकगणः

अस्य कार्यक्रमस्य पुरस्कारप्रदानसमारोहः ०२.०१.२०१६ दिनाङ्के संपन्नः। कार्यक्रमे सम्मानिताथिरूपेण चेन्नैस्थ-ऐम् फार् सेवा इत्याख्यस्य कार्यदर्शिनी श्रीमती शीला बालाजीमहाभागा, सारस्वतातिथिरूपेण जयपुरस्थश्रीजगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्व-विद्यालयस्य कुलपतिचरः आचार्यः के.वि.रामकृष्णमाचार्यः, विशिष्टातिथिरूपेण तिरुपतिस्थ-श्रीवेङ्कटेश्वरवेदविश्वविद्यालयस्य कुलपतिः आचार्यः का.ई. देवनाथवर्यः, अध्यक्षरूपेण राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्रिवर्यः च समलमकरोत्। एते विद्वांसः विजेतृभ्यः छात्रेभ्यः पुरस्कारं प्रदाय अन्वगृह्णन्।

## स्पर्धायां विजेतृनामानि



स्पर्धायां भाषमाणा छात्रा

**स्पर्धानाम : व्याकरणभाषणम्**

| | | |
|---|---|---|
| १. तृतीयः | लक्ष्मीनारायणः बि | मद्रपुरी सं.म.वि. |
| २. द्वितीयः | विदुषी बोल्ला | रा.सं.सं.क.जे.सोमैया सं.वि.,मुम्बई |
| ३. प्रथमः | निवेदितारथः | रा.सं.सं.श्रीसदाशिवपरिसरः, पुरी |

**स्पर्धानाम : साहित्यभाषणम्**

| | | |
|---|---|---|
| १. तृतीयः | एम्.रेवती सुप्रजा | रा.सं.वि., तिरुपतिः |
| २. द्वितीयः | सूर्य हेब्बार् ए. | रा.सं.सं.राजीवगान्धीपरिसरः, शृङ्गेरी |
| ३. प्रथमः | साधु चेतनः जे. | श्री वरतन्तु सं.म.वि., अहमदाबाद् |

मु ख्या ल य वा र्ता

**स्पर्धानाम : न्यायभाषणम्**

| | | | |
|---|---|---|---|
| १. | तृतीयः | भट्ट मौलिकः ए. | 'दर्शनम्' सं.म.वि., छारोडी |
| २. | द्वितीयः | ऐतरेयः एल्.बि.भारद्वाज | पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरुः |
| ३. | प्रथमः | मस्के महेश झुंबरः | श्रीविद्यापाठशाला |

**स्पर्धानाम : साङ्ख्य-योगभाषणम्**

| | | | |
|---|---|---|---|
| १. | तृतीयः | मृत्युञ्जयः शास्त्री | एस्.एम.एस.पि.सं.म. उडुपिः |
| २. | द्वितीयः | शिवशङ्कर होता | रा.सं.वि., तिरुपतिः |
| ३. | प्रथमः | के.मनोज्ञा | रा.सं.सं., एकलव्यपरिसरः |

**स्पर्धानाम : मीमांसाभाषणम्**

| | | | |
|---|---|---|---|
| १. | तृतीयः | हरिणः के.आर्. | मद्रपुरी सं.म.वि. |
| २. | द्वितीयः | मञ्जुनाथ भट्टः | रा.सं.सं.राजीवगान्धीपरिसरः |
| ३. | प्रथमः | श्रुतिप्रिय. के. | श्रीविद्यापाठशाला, गोवा |

**स्पर्धानाम : वेदान्तभाषणम्**

| | | | |
|---|---|---|---|
| १. | तृतीयः | सुप्रियगोस्वामी | रा.म.वि.वे.वि., बेलूरमठः |
| २. | द्वितीयः | आर्.पि.श्रीकृष्णः | पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरुः |
| ३. | प्रथमः | कार्तिक शर्मा के. | मद्रपुरी सं.म.वि., तमिलनाडुः |

**स्पर्धानाम : धर्मशास्त्रभाषणम्**

| | | | |
|---|---|---|---|
| १. | तृतीयः | सुशान्तिदेवनाथः | रा.सं.सं. एकलव्यपरिसरः |
| २. | द्वितीयः | मञ्जुनाथः हेगडे | एस्.एम.एस.पि.सं.म. उडुपिः |
| ३. | प्रथमः | दुर्गाशरणरथः | रा.सं.वि., तिरुपतिः |

**स्पर्धानाम : ज्यौतिषभाषणम्**

| | | | |
|---|---|---|---|
| १. | तृतीयः | भट्टदिव्येशः | श्रीवरतन्तु सं.म.वि., अहमदाबाद् |
| २. | द्वितीयः | श्रद्धाञ्जलिदाशः | रा.सं.सं. श्रीसदाशिवपरिसरः |
| ३. | प्रथमः | नागपति हेगडे | रा.सं.सं. राजीवगान्धीपरिसरः |

**स्पर्धानाम : साहित्यशलाकापरीक्षा**

| | | | |
|---|---|---|---|
| १. | तृतीयः | स्वाती | श्रीमद्-दयानन्दकन्या गु.म., चोटीपुरा, उत्तरप्रदेशः |
| २. | द्वितीयः | सुशान्तशर्मा | गुरुकुलच्छात्रः, जम्मू |
| ३. | प्रथमः | अभिषेककुमारः | रा.सं.सं. जयपुर-परिसरः |

**स्पर्धानाम : व्याकरणशलाकापरीक्षा**

| | | | |
|---|---|---|---|
| १. | प्र. श्रेणी | सीता | श्रीमद्-दयानन्दकन्या गु.म., चोटीपुरा, उत्तरप्रदेशः |
| २. | प्र. श्रेणी | सीता गोपालभाग्वत् | रा.सं.सं. राजीवगान्धीपरिसरः |
| ३. | प्र. श्रेणी | मीनाक्षी | रा.सं.सं. वेदव्यास-परिसरः |
| ४. | तृतीयः | आन्द्रेय् जगोरुल्को | रा.सं.सं.मु.स्वा.पी., देहली |
| ५. | द्वितीयः | जोषी राजनः एच्. | बाबडेश्वर सं.म.वि., पोरबन्दरम् |
| ६. | प्रथमः | अङ्कितकुमारः | श्रीभगवानदास आ.सं.म.वि., हरिद्वारम् |

**स्पर्धानाम : न्यायशलाकापरीक्षा**

| | | | |
|---|---|---|---|
| १. | तृतीयः | मंगेश आदिनाथमस्के | श्रीविद्यापाठशाला, गोवा |
| २. | द्वितीयः | गोविन्दवस्यालः | सम्पूर्णानन्द सं.वि.वि., वाराणसी |
| ३. | प्रथमः | के.एस्.कृष्णः | पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरुः |

**स्पर्धानाम : ज्यौतिषशलाकापरीक्षा**

| | | | |
|---|---|---|---|
| १. | तृतीयः | विघ्नेश-अय्यरः | रा.सं.सं.क.जे.सो.सं.वि., मुम्बई |
| २. | द्वितीयः | अंशुल दुबे | रा.सं.सं., भोपाल-परिसरः |
| ३. | प्रथमः | गौरवशर्मा | श्री वैष्णोदेवी गुरुवुलम्, जम्मू |

**स्पर्धानाम : वेदान्तशलाकापरीक्षा**

| | | | |
|---|---|---|---|
| १. | द्वितीयः | मनीषकुमारः | मद्रपुरी सं.म.वि., तमिलनाडुः |
| २. | प्रथमः | मध्वेश भट्टः | पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरुः |

**स्पर्धानाम : पुराणेतिहासशलाकापरीक्षा**

| | | | |
|---|---|---|---|
| १. | प्र. श्रेणी | भट्ट देवाङ्गः | रा.सं.सं. जयपुर-परिसरः |
| २. | तृतीयः | अविनाश कविः | पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरुः |
| ३. | द्वितीयः | सविता | पतंजलि योगपीठम्, हरिद्वारम् |
| ४. | प्रथमः | दीपशिखा | श्रीमद्-दयानन्दकन्या गु.म., चोटीपुरा |

**स्पर्धानाम : मीमांसाशलाकापरीक्षा**

| | | | |
|---|---|---|---|
| १. | तृतीयः | रामप्रियः | मद्रपुरी सं.म.वि., तमिलनाडुः |
| २. | द्वितीयः | एस्.एम्. प्रणवः | पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरुः |
| ३. | प्रथमः | गोपालशर्मा | श्रीविद्यापाठशाला, गोवा |

**स्पर्धानाम : काव्यकण्ठपाठः**

| | | | |
|---|---|---|---|
| १. | प्रोत्साहनम् | कुमार हेगडे | श्रीमाता सं.मह.पा., उम्मचगि |
| २. | प्रोत्साहनम् | चिन्मया इनामदार | ज्ञानप्रबोधिनी निगडी सं.पा. केन्द्र, पुणे |
| ३. | तृतीयः | पाठकसमीरः | बाबडेश्वर सं.म.वि., पोरबन्दरम् |
| ४. | द्वितीयः | सत्यप्रकाशः | श्रीमद्-दयानन्द आ.ज्यो.गु., उत्तराखण्डः |
| ५. | प्रथमः | विश्वम्भरा | श्रीमद्-दयानन्दकन्या गु.म., चोटीपुरा |

**स्पर्धानाम : अमरकोषकण्ठपाठः**

| | | | |
|---|---|---|---|
| १. | तृतीयः | एस्.अभिख्या | रा.सं.वि., तिरुपतिः |
| २. | द्वितीयः | प्रीतमबेरा | रा.म.वि.वे.वि., बेलूरमठः |
| ३. | प्रथमः | निशा | श्रीमद्-दयानन्दकन्या गु.म. |

**स्पर्धानाम : अष्टाध्यायीकण्ठपाठः**

| | | | |
|---|---|---|---|
| १. | प्रोत्साहनम् | महेता अक्षयः एच् | बाबडेश्वर सं.म.वि., पोरबन्दरम् |
| २. | प्रोत्साहनम् | मनोजतिवारी | रा.सं.सं., भोपाल-परिसरः |
| ३. | तृतीयः | रूपेशभोई | आमसेना गुरुकुलम् आश्रमः, नवापरा |
| ४. | द्वितीयः | भानुप्रतापः | गौतमनगर, देहली |
| ५. | प्रथमः | योगिता छत्रे | रा.सं.सं. राजीवगान्धीपरिसरः |

**स्पर्धानाम : धातुरूपकण्ठपाठः**

| | | | |
|---|---|---|---|
| १. | प्रोत्साहनम् | अनमोल-उपाध्यायः | रा.सं.सं., भोपाल-परिसरः |
| २. | प्रोत्साहनः | सर्वेशकुमारतिवारी | वेदविज्ञानगुरुकुलम्, कर्णाटकम् |
| ३. | प्रोत्साहनः | प्रियार्चना | विपाशातीरगुरुकुलम्, हि.प्रदेशः |
| ४. | तृतीयः | राहुलगाजी | रा.म.वि.वे.वि., बेलूरमठः, प.ब. |
| ५. | द्वितीयः | सुरुचिः | आर्यकन्यागुरुकुलम्, राजस्थानम् |
| ६. | प्रथमः | स्वस्ति | श्रीमद्-दयानन्दकन्या गु.म. |

**स्पर्धानाम : शास्त्रार्थविचारः**

| | | | |
|---|---|---|---|
| १. | प्रोत्साहनम् | जितेन्द्रकुमारतिवारी | रा.सं.सं. लखनऊपरिसरः |
| २. | प्रोत्साहनम् | पी.आर्. वासुदेवः | मद्रपुरी सं.म.वि., तमिलनाडुः |
| ३. | तृतीयः | साधुमुनिवत्सलदासः | 'दर्शनम्' सं.म.वि., गुजरातम् |
| ४. | द्वितीयः | श्रीनिधिः प्याटि | कर्नाटकम् सं.वि.वि., बेङ्गलूरुः |
| ५. | प्रथमः | शम्भुनाथभट्टः | कर्नाटकम् सं.वि.वि., बेङ्गलूरुः |

**स्पर्धानाम : समस्यापूर्तिः**

| | | | |
|---|---|---|---|
| १. | तृतीयः | श्रुतिप्रिय.के. | श्रीविद्यापाठशाला, गोवा |
| २. | द्वितीयः | हिमांशुगौडः | रा.सं.सं., भोपाल-परिसरः |
| ३. | प्रथमः | सूर्य हेब्बार् ए | रा.सं.सं. राजीवगान्धीपरिसरः |

**स्पर्धानाम : अक्षरश्लोकी**

| | | | |
|---|---|---|---|
| १. | तृतीयः | दीपककुमारचौधरी | ज.ना.आदर्श. सं.म., दरभङ्गा |
| २. | द्वितीयः | प्रभाशर्मा | रा.सं.वि., तिरुपतिः,आन्ध्रप्रदेशः |
| ३. | प्रथमः | सन्दीपसेमवालः | श्री ला.ब.शा.रा.सं.वि., देहली |

**स्पर्धानाम : ऋग्वेदपदपाठः**

| | | | |
|---|---|---|---|
| १. | तृतीयः | वासुदेवः | श्री वेदव्यास पा., तमिलनाडुः |
| २. | द्वितीयः | सत्यं शुक्लः | एस्.वी.वेद वि.वि., तिरुपतिः |
| ३. | प्रथमः | हरिकेश देवीदासः | श्री राजराजेश्वरी सं.म.पा. स्वर्णवल्लि, कर्णाटकम् |

**स्पर्धानाम : शुक्लयजुर्वेदपाठः**

| | | | |
|---|---|---|---|
| १. | तृतीयः | राकेशशर्मा | गुरुकुलछात्रः, जम्मू |
| २. | द्वितीयः | अखण्ड श्रीहरिः | एस्.वी.वेद वि.वि., तिरुपतिः |
| ३. | प्रथमः | आनन्दः जोशि | श्री जयेन्द्रसरस्वति गुरुकुलम्, कर्णाटकम् |

**स्पर्धानाम : कृष्णयजुर्वेदपदपाठः**

| | | | |
|---|---|---|---|
| १. | तृतीयः | प्रसन्नवेङ्कटेशः | मद्रपुरी सं.म.वि., तमिलनाडुः |
| २. | द्वितीयः | भार्गवः | श्री चामराजेन्द्र महा पा., बेङ्गलूरुः |
| ३. | प्रथमः | ए.भारद्वाजशर्मा | एस्.वी.वेद वि.वि., तिरुपतिः |

**स्पर्धानाम : जैन-बौद्ध-दर्शनभाषणम्**

| | | | |
|---|---|---|---|
| १. | तृतीयः | जानीमयूरः | श्री वरतन्तु सं.म.वि., गुजरातम् |
| २. | द्वितीयः | गिरिराजः उपाध्यायः | एस्.एम.एस.पि.सं.म., उडुपिः |
| ३. | प्रथमः | सर्वेशजैनः | रा.सं.सं., भोपाल-परिसरः |

**स्पर्धानाम : श्रीमद्भगवद्गीताकण्ठपाठः**

| | | | |
|---|---|---|---|
| १. | तृतीयः | आत्मारामभट्टः के | वेदविज्ञान गुरुकुलम्,कर्णाटकम् |
| २. | द्वितीयः | आलोकमिश्रः | पाणिनीय शो.सं., बिलासपुरम् |
| ३. | प्रथमः | साधुनिरञ्जनदासः | 'दर्शनम्' सं.म.वि., गुजरातम् |

**स्पर्धानाम : वेदपाठान्त्याक्षरी**

| | | | |
|---|---|---|---|
| १. | तृतीयः | सञ्जीव काफले | एस्.वी.वेद वि.वि., तिरुपतिः |
| २. | द्वितीयः | हरिकेशदेवीदास-कुलकर्णि | श्री राजराजेश्वरी सं.म.पा. स्वर्णवल्लि, कर्णाटकम् |
| ३. | प्रथमः | अक्षयश्रीपादभट्टः कुलकर्णि | श्री राजराजेश्वरी सं.म.पा. स्वर्णवल्लि, कर्णाटकम् |

**स्पर्धानाम : शास्त्रीयस्फूर्तिस्पर्धा**

| | | | |
|---|---|---|---|
| १. | तृतीयः | अभिषेककुमारः | रा.सं.सं. जयपुर-परिसरः |
| २. | तृतीयः | बुद्धिप्रकाशजागिडः | रा.सं.सं. जयपुर-परिसरः |
| ३. | द्वितीयः | दुर्गाशरणरथः | रा.सं.वि., तिरुपतिः |
| ४. | द्वितीयः | शिवशङ्करहोता | रा.सं.वि., तिरुपतिः |
| ५. | प्रथमः | शम्भुनाथभट्टः | कर्नाटक सं.वि.वि., बेङ्गलूरुः |
| ६. | प्रथमः | सूर्य हेब्बार् ए. | रा.सं.सं. राजीवगान्धीपरिसरः |

## समनुष्ठितः द्वादशः संस्कृतनाट्योत्सवः

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् आयोज्यमानः अन्तःपरिसरीयसंस्कृत-नाट्यस्पर्धामहोत्सवः ०४.०२.२०१५ तः ०६.०२.२०१५ दिनाङ्कं यावत् देहलीविश्व-विद्यालयस्य शङ्करहाल-कन्सर्ट-प्रेक्षागृहे समायोजितः। संस्कृतनाट्यमहोत्सवस्य उद्घाटनसमारोहः ०४.०२.२०१५ दिनाङ्के सम्पन्नः। तत्र मुख्यातिथिपदं नवदेहलीस्थ-इन्दिरागान्धीराष्ट्रियकलाकेन्द्रस्य अध्यक्षः जिन्मय आर.घोरघान्-महाभागाः सारस्वतातिथिपदं देहलीस्थ-भोगीलाललहेरचन्दजैनसंस्थानस्य निदेशकाः डॉ. गयाचरणत्रिपाठिवर्याः, अध्यक्षपदं संस्थानस्य कुलपतयः डॉ. सुखवीर सिंह-सन्धू-महाभागाः समलङ्कृतवन्तः।



उद्घाटनकार्यक्रमस्य किञ्चन् दृश्यम्

०४.०२.२०१५ अपराह्णे इलाहाबादस्थ-गङ्गानाथझा-परिसरेण मुद्राराक्षसम् (१-३ अङ्काः) गुरुवायूरपरिसरेण मुद्राराक्षसम् (४-७ अङ्काः) राजीवगान्धीपरिसरेण बालभारतम् च अभिनीतम्।

०५.०२.२०१५ दिनाङ्के लखनऊ-परिसरेण मालतीमाधवम् (१-३ अङ्काः) भोपालपरिसरेण मालतीमाधवम् (४-७ अङ्काः), मुम्बईपरिसरेण मालतीमाधवम् (८-१० अङ्काः), वेदव्यासपरिसरेण बालरामायणम् (१-३ अङ्काः), रणवीरपरिसरेण बालरामायणम् (४-७ अङ्काः), जयपुरपरिसरेण बालरामायणम् (८-१० अङ्काः) च अभ्यनीयत।

०६.०२.२०१५ दिनाङ्के पूर्वाह्णे सदाशिवपरिसरेण महावीरचरितम् (१-४ अङ्काः), एकलव्यपरिसरेण महावीरचरितम् (५-७ अङ्काः) च अभिनीतम्।

संस्कृतनाट्योत्सवस्य समापनसमारोहः ०६.०२.२०१५ दिनाङ्के संपन्नः। तत्र मुख्यतिथिपदम् इलाहाबादस्थ-समानान्तरसंस्थायाः महामन्त्रिणः श्री अनिलरञ्जनभौमिकमहाभागाः, सारस्वतातिथिपदं दिल्लीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षाः प्रो. रमेशभारद्वाजमहाभागाः, अध्यक्षपदं संस्थानस्य कुलपतयः डॉ सुखवीरसिंहसन्धू-महाभागाः अलमकार्षुः।

# समाचरितः त्रयोदशः संस्कृतनाट्योत्सवः


राष्ट्रियसंस्कृतसंस्थानस्य अन्तःपरिसरीयसंस्कृतनाट्यस्पर्धारूपः त्रयोदशः संस्कृतनाट्यमहोत्सवः २४.०२.२०१६ तः २६.०२.२०१६ दिनाङ्कं यावत् केन्द्रीयविद्यालयस्य राधा-कृष्णन्-सभागारे समनुष्ठितः। अस्योत्सवस्य उद्घाटनसमारोहे मुख्यातिथिपदं विश्रुताः संस्कृतमनीषिणः विद्वान् एच्.वी. नागराजरावमहोदयाः सारस्वतातिथिपदं लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतयः प्रो. रमेशकुमारपाण्डेयवर्याः, अध्यक्षपदं संस्थानस्य कुलपतयः प्रो. परमेश्वरनारायणशास्त्रिवर्याः अलङ्कृतवन्तः। अस्मिन् उत्सवे प्रहसनरूपकाणाम् अभिनयः कृतः।

२४.०२.२०१६ अपराह्णे श्रीरणवीरपरिसरेण लटकमेलकम्, एकलव्यपरिसरेण वञ्चकपञ्चकम्, वेदव्यासपरिसरेण कुहनाभैक्षवम् इति प्रहसनम् अभ्यनीयत।

२५.०२.२०१६ दिनाङ्के गङ्गानाथझापरिसरेण मृदङ्गदासप्रहसनम्, लखनऊपरिसरेण स्नुषा-विजयम्, सदाशिवपरिसरेण हास्यार्णवप्रहसनम्, जयपुरपरिसरेण पलाण्डुमण्डनम्, गुरुवायूरपरिसरेण मत्तविलासः च अभिनीतम्।

२६.०२.२०१६ दिनाङ्के मुम्बईपरिसरेण विवाहविडम्बनम्, भोपालपरिसरेण हास्यचूडामणिः, राजीवगान्धीपरिसरेण भगवदज्जुकीयम् च अभ्यनीयत।

संस्कृतनाट्यमहोत्सवस्य समापनसमारोहः २६.०२.२०१६ दिनाङ्के सायं सम्पन्नः। कार्यक्रमे मुख्यातिथित्वं संपूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कुलपतिचराः प्रो. अभिराजराजेन्द्रमिश्राः, सारस्वताथित्वं एन्.एम्.के.आर्.वी. महिलामहाविद्यालयस्य संस्कृतविभागस्य भूतपूर्वविभागाध्यक्षाः प्रो. एस्.आर्. लीलामहाभागाः, अध्यक्षतां संस्थानस्य कुलपतयः प्रो. परमेश्वरनारायणशास्त्रिवर्याः च अलमकुर्वन्। अस्य कार्यक्रमस्य संयोजकः प्रो. रमाकान्तपाण्डेयवर्यः आसीत्।



संस्कृतनाट्योत्सवम् उद्घाटयन् अतिथिगणः

नाट्योत्सवे प्रथमं द्वितीयं तृतीयं च स्थानं प्राप्ताः परिसराः

१. गुरुवायूर्परिसरः, त्रिश्शूरः

२. क.जे.सोमय्यापरिसरः, मुम्बई

३. राजीवगान्धीपरिसरः, शृङ्गेरी

सर्वोत्तमः अभिनेता-श्री अनुपमगर्गः (भोपालपरिसरः)


सर्वोत्तमा अभिनेत्री-सुश्री प्रियङ्का शर्मा (एकलव्यपरिसरः)

प्रतिपरिसरं प्रथम-द्वितीय-तृतीय-पुरस्काराः इत्थं सन्ति।

| | | | |
|---|---|---|---|
| **लटकमेलकम्** | प्रथमः | पुरुषोत्तमदासः | जन्तुकेतुः |
| (श्रीरणवीरपरिसरः जम्मू) | द्वितीयः | स्नेहापाण्डेयः | दन्तुरा |
| | तृतीयः | अरुणकुमारनाइक | कुलव्याधिः |
| **वञ्चकपञ्चकम्** | प्रथमः | प्रियंकाशर्मा | दन्तुरा |
| (एकलव्यपरिसरः, अगरतला) | द्वितीयः | भास्करब्यानार्जी | कौलेयकः |
| | तृतीयः | विजयकृष्णगोस्वामी | दिगम्बरः |
| **कुहनाभैक्षवम्** | प्रथमः | पवनकुमारः | भिक्षुकः |
| (श्रीवेदव्यासपरिसरः, बलाहरः) | द्वितीयः | विनोदशर्मा | दामोदरः |
| | तृतीयः | टेकचन्दः | गोविन्दः |
| **मृदङ्गदासप्रहसनम्** | प्रथमः | देवेन्द्रदुबे | मृदङ्गदासः |
| (श्रीगङ्गानाथझापरिसरः, इलाहाबाद) | द्वितीयः | विपिनद्विवेदी | कुम्भदासः |
| | तृतीयः | सन्तोषकुमारः | रक्षिपुरुषः |
| **स्नुषाविजयम्** | प्रथमः | दीपाली आर्या | दुराशा |
| (लखनऊपरिसरः) | द्वितीयः | स्वास्तेयनकुमारपाण्डेयः | सुशील |
| | तृतीयः | काजलः | सच्चरित्रा |
| **हास्यार्णवप्रहसनम्** | प्रथमः | निहारिकात्रिपाठी | गुप्तचरः |
| (श्रीसदाशिवपरिसरः, पुरी) | द्वितीयः | सुप्रभासाहुः | बन्धुरा |
| | तृतीयः | रविनारायणआचार्यः | अनयसिन्धुः |



सम्मानयन् कुलपतिवर्यः




पूर्वरङ्गं प्रस्तुवन्तः कुशीलवाः

| | | | |
|---|---|---|---|
| **पलाण्डुमण्डनम्** | प्रथमः | अर्जुनदेवः | सूत्रधारः |
| (जयपुरपरिसरः, जयपुरम्) | द्वितीयः | पीयूषशर्मा | लिङ्गोजीभट्टः |
| | तृतीयः | मदनगोपालः | प्रजापतिदेवः |
| **मत्तविलासः** | प्रथमः | हरिता टी. | देवसोमा |
| (गुरुवायूरपरिसरः, गुरुवायूरम्) | द्वितीयः | हरिप्रसाद एस. | सत्यसोमः |
| | तृतीयः | श्रीराज पी.आर. | शाक्यभिक्षुः |
| **विवाहविडम्बनम्** | प्रथमः | जीवनजोशी | कङ्कः |
| (श्रीके.जे.सोमैयापरिसरः, मुम्बई) | द्वितीयः | अनूपजोशी | रतिकान्तः |
| | तृतीयः | कु. कल्पनासाहू | खड्गधरा |
| **हास्यचूडामणिः** | प्रथमः | आयुषदीक्षितः | कौण्डिन्यः |
| (भोपालपरिसरः, भोपालम्) | द्वितीयः | अनुपमगर्गः | ज्ञानराशिः |
| | तृतीयः | कल्याणी फगरे | कपटकेलिः |
| **भगवदज्जुकीयम्** | प्रथमः | नवनीतकृष्णन् के.एच्. | शाण्डिल्यः |
| (श्रीराजीवगान्धीपरिसरः, शृङ्गेरी) | द्वितीयः | मञ्जुनाथभट्टः | परिव्राजकः |
| | तृतीयः | अहल्या ए. भट्टः | वसन्तसेना |




संस्कृतनाट्योत्सवे अभिनयन् छात्रगणः



विजेतृगणस्य एकं दृश्यम्

## सम्पन्नः सप्तमः युवमहोत्सवः

राष्ट्रिय संस्कृतसंस्थानस्य विशिष्टेषु कार्यक्रमेषु अन्यतमः अन्तःपरिसरीयः युवमहोत्सवः। सप्तमः अन्तःपरिसरीयः युवमहोत्सवः शृङ्गेरीस्थ-राजीवगान्धीपरिसरे सम्पन्नः। अस्मिन् महोत्सवे राष्ट्रियसंस्कृतसंस्थानस्य एकादश-परिसरेभ्यः समागताः छात्राः सोत्साहं, सांस्कृतिक-क्रीडा-शैक्षिकस्पर्धासु भागं गृहीतवन्तः। युवमहोत्सवस्य शोभायात्रायां विविधेभ्यः परिसरेभ्यः समागताः छात्राः तत्तद्-राज्यस्य संस्कृतिप्रतिभूतेन वेषेण भागम् अगृह्णन्। त्रिदिनव्यापिनि महोत्सवे शृङ्गेरीस्थ-राजीवगान्धीपरिसरः अधिकान् अङ्कान् अवाप्य विजयवैजयन्त्या विभूषितः। द्वितीयस्थानं जयपुरपरिसरेण तृतीयस्थानं वेदव्यासपरिसरेण च समलङ्कृतम्।



शोभायात्रायाम् अतिथिभिः सह प्राचार्याः



क्रीडास्पर्धोद्घाटनस्य एकं चित्रम्




स्पर्धालुः छात्रः

## समाचरितः द्वितीयः अन्ताराष्ट्रिययोगदिवसः

संस्थाने अन्ताराष्ट्रिययोगदिवसः २१.०६.२०१६ दिनाङ्के समाचरितः। कुलपतिप्रमुखा अन्ये अधिकारिणः भागम् अग्रहीषुः।



योगाभ्यासे रताः मुख्यालयीयाः



योगाभ्यासं कुर्वता कुलपतिना सह मुख्यालयीयाः



सुखासने उपविष्टाः मुख्यालयसदस्याः

## सोल्लासं सम्पन्नः अष्टमः युवमहोत्सवः

संस्थानस्य प्रतिष्ठास्पदम् अष्टमः अन्तःपरिसरीयः युवमहोत्सवः ३०.१०.२०१५ तः ०२.११.२०१५ दिनाङ्कपर्यन्तं हिमाचलस्थे वेदव्यासपरिसरे समनुष्ठितः। परारिपरुदिव अस्मिन् युवमहोत्सवेऽपि साहित्य-सङ्गीत-कला-क्रीडादि-स्पर्धासु संस्थानपरिसरीयाः छात्राः सोत्साहं भागम् अन्वग्रहीषुः। तत्र उद्‌घाटनसत्रे युवमहोत्सवस्य संस्कृतप्रदीपप्रकाशनपरा भव्यशोभायात्रा हिमाचललोकनिनादैः सह भारतस्य प्राचीनग्रामेषु अन्यतमे हिमाचलस्थे उपपरिसरं विराजमाने प्रागपुरग्रामे समजनि। तत्तत्प्रान्तीयवेशभूषया सह संभूषितान् छात्रान् दर्शं दर्शं मोदम् आप्नुवान् नागरिकाः। ध्वजोत्तोलनात् परं प्रवृत्ते उद्‌घाटनसत्रे संस्थानस्य कुलपतिना प्रो. परमेश्वरनारायणशास्त्रिमहोदयेन आध्यक्षं, होशियापुरस्थ-विवेकानन्द-आयुर्वेद-विश्वविद्यालयस्य कुलपतिना प्रो. ओम्-प्रकाश-उपाध्ययमहाभागेन सारस्वतातिथिपदं संस्कृतसंदेश-पत्रिकायाः संपादकेन श्री जनार्दनहेगडेमहाभागेन विशिष्टातिथिपदं च समलमकारि। एवं संस्थानस्य परिसरप्राचार्यैः अपि अधिमञ्चं व्यभूषि। अवसरेऽस्मिन् वेदव्यासपरिसरप्राचार्येण प्रो. लक्ष्मीनिवासपाण्डेयवर्येण पुष्पकदम्बं समर्प्य स्वागतं व्यधायि। ततः प्रसिद्धयोगविज्ञातेन प्रो. ओम्-प्रकाश-उपाध्यायर्वेण अवादि यत् अस्माकं पूर्वऋषिभिः शारीरिकमानसिकस्वास्थ्याय योगस्य अन्वेषणं कृतम्। तेन योगेन शरीरस्य मानसिकस्य स्वास्थ्यं वर्धत इति। एवं विशिष्टातिथिना श्री जनार्दन-हेगडे-महोदयेन शैक्षिकाभ्यासेन सह शारीरिकाभ्यासस्यापि आवश्यकता अस्ति। एतादृशमहोत्सवस्य आचारणेन मनः प्रफुल्लितं भवति इति अभाणि। तत्रैव आध्यक्षपदं वहता संस्थानस्य कुलपतिना प्रो. परमेश्वरनारायणशास्त्रिवर्येण अवोचि यत् युवा स्यात् सुयुवाध्यायकः आशिष्टो दृढिष्ठो बलिष्ठः इति वेदः निगदति। अतः यूनां शारीरिकमानसिकविकासः अपेक्षितः स च विकासः एतदृशस्पर्धायां भागग्रहणेन भवतीति। सत्रान्ते वेदव्यासपरिसरस्य ज्योतिषविभागाध्यक्षेण डॉ. पी.वी.बी. सुब्रह्मण्यमहोदयेन धन्यवादः समर्पितः।

अतः परं दिनत्रयं यावत् बहवः स्पर्धाः समजायन्त। सांस्कृतिकस्पर्धासु एककसङ्गीत-शास्त्रीयगायन-वादन-नृत्यभिनय-स्पर्धाः अवर्तन्त। एवमेव चित्रकलास्पर्धासु आशुचित्रण-भित्तिपत्रनिर्माण-व्यङ्ग्यचित्र-निर्माण-रङ्गवल्लीचित्रणानाम् आयोजनं समजनि। शैक्षिकस्पर्धासु कण्ठपाठ-वादविवाद-सङ्गणकीयसंस्कृतस्पर्धा-स्फूर्तिस्पर्धाः समजनिषत। खो-खो, कबड्डी-हस्तकन्दुकम्, धावनम्, कूर्दनम्, कुन्तक्षेपणम्, गोलक्षेपणम्, चक्रक्षेपणम्, योगासनम्, इत्यादि स्पर्धाः अभवन्। विविधस्पर्धानां निर्णायकेषु, प्रो. आजादमिश्रः, प्रो. सन्ध्या पुरेछा, प्रो. मणि कण्डन्, डॉ. मुरली, डॉ. दिनकर मराठे, डॉ. सतीशः, डॉ. रङ्गनाथन्, डॉ. पङ्कजव्यासः, इत्यादिभिः प्रथितैः विद्वद्भिः सह भारतीयक्रीडाप्राधिकरणस्य अधिकारिणः च प्रमुखाः आसन्।

०२.११.२०१५ दिनाङ्के अपराह्णे युवमहोत्सवस्य सम्पूर्तिसमारोहः समनुष्ठितः। समारोहेऽस्मिन् हिमाचलप्रदेशराज्यस्य महामहिमराज्यपालाः श्रीमन्तः देवव्रतवर्याः मुख्यातिथिपदम् अलङ्कृतवन्तः। एतेषां स्वागतं संस्थानस्य कुलपतिवर्यैः व्यधायि। युवमहोत्सवस्य स्पर्धासु शृङ्गेरीस्थराजीवगान्धीपरिसरः सर्वाधिकान् अङ्कान् अवाप्य प्रथमं स्थानं लब्ध्वा विजयवैजयन्तीम् अलभत। तत्परिसरपक्षतः प्राचार्यः प्रो. ए.पी. सच्चिदानन्दवर्यः, डॉ. सि.एस्.एस् नरसिंहमूर्तिः, डॉ. चन्द्रकान्तः, डॉ. चन्द्रकला, एच्.डी. रामचन्द्रश्च विजयवैजयन्तीम् अविन्दन्त। द्वितीयस्थानं लब्धवतः वेदव्यासपरिसरस्य मार्गदर्शकः डॉ. संजयकुमारः, डॉ. सुज्ञानकुमारमहान्तिः डॉ. प्रीतिशर्मा च पुरस्कारम् अगृह्णन्। राज्यपालाः देवव्रतवर्याः पुरस्कारभाग्भ्यः छात्रेभ्यः अभिनन्दनम् आहार्षुः। परिसरप्राचार्याः सर्वेभ्यः धन्यवादं व्यदधुः।

### विजयिनां सूची

**सुभाषितकण्ठपाठः (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | भट्ट देवाङ्गः | जयपुरपरिसरः |
| २. | द्वितीयपुरस्कारः | गौरवः | वेदव्यासपरिसरः |
| ३. | तृतीयपुरस्कारः | पुरुषोत्तम दासः | श्रीरणवीरपरिसरः |

**सुभाषितकण्ठपाठः (बालिकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | सोनाली | वेदव्यासपरिसरः |
| २. | द्वितीयपुरस्कारः | आतिरा.सि | गुरुवायूर्-परिसरः |
| ३. | तृतीयपुरस्कारः | रंजिता कर | एकलव्यपरिसरः |

**वादविवादस्पर्धा (पक्षे)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | केवलीया मयूर | जयपुरपरिसरः |
| २. | द्वितीयपुरस्कारः | स्वर्णदत्त बाहेरवाडे | राजीवगान्धीपरिसरः |
| ३. | तृतीयपुरस्कारः | एस्. हरिप्रसाद | गुरुवायूर्-परिसरः |

**वादविवादस्पर्धा (विपक्षे)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | भट्ट देवाङ्गः | जयपुरपरिसरः |
| २. | द्वितीयपुरस्कारः | सूर्यहेब्बारः ए. | राजीवगान्धीपरिसरः |
| ३. | तृतीयपुरस्कारः | पंकजः | वेदव्यासपरिसरः |

**स्फूर्तिस्पर्धा**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | सूर्यहेब्बारः ए. | राजीवगान्धीपरिसरः |
| १. | प्रथमपुरस्कारः | कोण्डि अनिरुद्ध राममूर्तिः | राजीवगान्धीपरिसरः |
| २. | द्वितीयपुरस्कारः | हेमन्त सिंह यादवः | जयपुरपरिसरः |
| २. | द्वितीयपुरस्कारः | फिरोजः | जयपुरपरिसरः |
| ३. | तृतीयपुरस्कारः | चित्तरञ्जन राजः | गुरुवायूर्-परिसरः |
| ३. | तृतीयपुरस्कारः | गिरिजा शङ्कर होता | गुरुवायूर्-परिसरः |

**आशुभाषणम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | स्वर्णदत्त बाहेरवाडे | राजीवगान्धीपरिसरः |
| २. | द्वितीयपुरस्कारः | उमेश कुमार पाण्डेयः | जयपुरपरिसरः |
| ३. | तृतीयपुरस्कारः | रोहित कुमारः | श्रीरणवीरपरिसरः |

**अनुवादस्पर्धा (हिन्दीतः संस्कृतम्)**

१. प्रथमपुरस्कारः रमाकान्त साह श्री सदाशिवपरिसरः
२. द्वितीयपुरस्कारः योगिता दि. छत्रे राजीवगान्धीपरिसरः
३. तृतीयपुरस्कारः दिव्यरंजन लखनऊ-परिसरः

**अनुवादस्पर्धा (आङ्ग्लतः संस्कृतम्)**

१. प्रथमपुरस्कारः बुद्धिप्रकाश जाङ्गिड जयपुरपरिसरः
२. द्वितीयपुरस्कारः योगिता दि. छत्रे राजीवगान्धीपरिसरः
३. तृतीयपुरस्कारः सुकन्या सेनापती श्री सदाशिवपरिसरः

**गद्यरचना**

१. प्रथमपुरस्कारः सूर्यहेब्बारः ए. राजीवगान्धीपरिसरः
२. द्वितीयपुरस्कारः हेमन्त सिंह यादवः जयपुरपरिसरः
३. तृतीयपुरस्कारः विघ्नेश अय्यर क.जे.सो. परिसरः

**पद्यरचना**

१. प्रथमपुरस्कारः सूर्यहेब्बारः ए. राजीवगान्धीपरिसरः
२. द्वितीयपुरस्कारः विघ्नेश अय्यर् क.जे.सो. परिसरः
३. तृतीयपुरस्कारः बुद्धिप्रकाश जाङ्गिड जयपुरपरिसरः
४. प्रोत्साहनपुरस्कारः पंकजः वेदव्यासपरिसरः

**संस्कृते वार्तालेखनम्**

१. प्रथमपुरस्कारः योगिता दि. छत्रे राजीवगान्धीपरिसरः
२. द्वितीयपुरस्कारः रमाकान्त साह श्री सदाशिवपरिसरः
३. तृतीयपुरस्कारः हेमन्त सिंह यादवः जयपुरपरिसरः

**सङ्गणकीय-संस्कृतम्**

१. प्रथमपुरस्कारः गोपाल कृष्ण नन्दः भोपालपरिसरः
२. द्वितीयपुरस्कारः विशाल जोशी क.जे.सो. परिसरः
३. तृतीयपुरस्कारः गोपाल कृष्ण हङ्गारि राजीवगान्धीपरिसरः

**आशुचित्रणम्**

१. प्रथमपुरस्कारः श्रुति.के.बि गुरुवायूर्-परिसरः
२. द्वितीयपुरस्कारः ज्योतिरञ्जन नन्दः क.जे.सो. परिसरः
३. तृतीयपुरस्कारः महावीर प्रसाद साथुआ श्री सदाशिवपरिसरः

**व्यङ्ग्यचित्रम्**

१. प्रथमपुरस्कारः धर्मेन्द्र शर्मा भोपालपरिसरः
२. द्वितीयपुरस्कारः श्रुति जैन जयपुरपरिसरः
३. तृतीयपुरस्कारः श्रीश समीर के. एस्. राजीवगान्धीपरिसरः

**प्रचारपत्रकनिर्माणम्**

१. प्रथमपुरस्कारः ज्योतिरञ्जन नन्दः क.जे.सोमैयापरिसरः
२. द्वितीयपुरस्कारः श्रुति.के.बि गुरुवायूर्-परिसरः
३. तृतीयपुरस्कारः बुद्धिप्रकाश जाङ्गिड जयपुरपरिसरः

**रङ्गवल्ली**

१. प्रथमपुरस्कारः महावीर प्रसाद साथुआ श्री सदाशिवपरिसरः
२. द्वितीयपुरस्कारः सुमित्रा साहुः वेदव्यासपरिसरः
३. तृतीयपुरस्कारः पूजा सिंहः गङ्गानाथझापरिसरः

**एकक-संस्कृतगीतम् (बालकानाम्)**

१. प्रथमपुरस्कारः चिन्मयविश्वनाथभट्टः राजीवगान्धीपरिसरः
२. द्वितीयपुरस्कारः गौरवः वेदव्यासपरिसरः
३. तृतीयपुरस्कारः पूरन चन्दः श्रीरणवीरपरिसरः

**एकक-संस्कृतगीतम् (बालिकानाम्)**

१. प्रथमपुरस्कारः भवानी आर. कुरन्द्वाड राजीवगान्धीपरिसरः
२. द्वितीयपुरस्कारः इन्दिरा.एन्.बि गुरुवायूर्परिसरः
३. तृतीयपुरस्कारः चिन्मयी राउतराय श्री सदाशिवपरिसरः

**एकक-शास्त्रीयगानम् (बालकानाम्)**

१. प्रथमपुरस्कारः कोण्डिअनिरुद्धराममूर्तिःराजीवगान्धीपरिसरः
२. द्वितीयपुरस्कारः श्रीनाथन्.के.पि गुरुवायूर्-परिसरः
३. तृतीयपुरस्कारः अमनदीपशर्मा वेदव्यासपरिसरः

**एकक-शास्त्रीयगानम् (बालिकानाम्)**

१. प्रथमपुरस्कारः इन्दिरा.एन्.बि गुरुवायूर्-परिसरः
२. द्वितीयपुरस्कारः कोण्डिअमृताराममूर्तिः राजीवगान्धीपरिसरः
३. तृतीयपुरस्कारः स्नेहा पाण्डेयः श्रीरणवीरपरिसरः

**समूहगानम्**

१. प्रथमपुरस्कारः - अञ्जु.पि.एस्, आतिरा.बाबु, अश्वति.मनोज्, इन्दिरा. एन्.बि, श्रीनाथन्.के.पि, अनिल.एल् (गुरुवायूर्-परिसरः)
२. द्वितीयपुरस्कारः - गौरव, वैजयन्ती माला, शिवा कुमारी, सोनाली, अमनदीप शर्मा, अमरजीतः (वेदव्यासपरिसरः)
३. तृतीयपुरस्कारः - प्रियांका शर्मा, पूजा नाथ, अनिन्दिता शर्मा, हीरा बाल्मीकि, राखी कलई, रंजिता कर (एकलव्यपरिसरः)
४. प्रोत्साहनपुरस्कारः - भावुक शर्मा, अरुण कुमार नायक, शुभदा प्रियदर्शिनी, कल्पना सामल, कामिनी चन्द्र, सस्मिता साहू, विजीस्मिता नन्द (श्रीरणवीरपरिसरः)

**एकक-शास्त्रीयवादनम्**

१. प्रथमपुरस्कारः हृषिकेश.टि.एस् गुरुवायूर्-परिसरः
२. द्वितीयपुरस्कारः कोण्डिअनिरुद्धराममूर्तिःराजीवगान्धीपरिसरः
३. तृतीयपुरस्कारः राजेश कालोनी लखनऊ-परिसरः

**एकक-शास्त्रीयनृत्यम्**

१. प्रथमपुरस्कारः रुचिस्मिता वेहेरा श्री सदाशिवपरिसरः
२. द्वितीयपुरस्कारः प्रतीक्षा.के.पि गुरुवायूर्-परिसरः
३. तृतीयपुरस्कारः कल्याणी फगरे भोपालपरिसरः
४. प्रोत्साहनपुरस्कारः सुश्रीभाग्यश्री श्रीचन्दन क.जे.सो. परिसरः

**सङ्घनृत्यम्**

१. प्रथमपुरस्कारः - प्रियंका सिन्हा, राखी कलई, अनन्या गिरि, मम्पी देवनाथ, के.मनोग्ना, हीरा बाल्मीकि (एकलव्यपरिसरः)
२. द्वितीयपुरस्कारः - साश्वति वारिक, गिताश्री पट्टनायक, प्रितम प्रिया साहु, श्री, शारदा भारति, जलेश्वरि पात्रः, विष्णुप्रिया महापात्रः (श्री सदाशिवपरिसरः)
३. तृतीयपुरस्कारः - अहल्या ए. भट्टः, वसुधा के.एन्., त्रिदला इ. जि., भवानी आर. कुरन्द्वाड, कमला हुलगप्प नेल्लूर, सूर्यप्रभा एस्. (राजीवगान्धीपरिसरः)

**एकपात्राभिनयः**

१. प्रथमपुरस्कारः पुरुषोत्तम दासः श्रीरणवीरपरिसरः
२. द्वितीयपुरस्कारः अहल्या ए. भट्टः राजीवगान्धीपरिसरः
३. तृतीयपुरस्कारः हरिप्रसाद.एस् गुरुवायूर्-परिसरः

**योगासनम् (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | निशेष तोमर: | वेदव्यासपरिसर: |
| २. | द्वितीयपुरस्कार: | सुमित कुमार: | जयपुरपरिसर: |
| ३. | तृतीयपुरस्कार: | महीपाल आर्य | भोपालपरिसर: |

**योगासनम् (बालिकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | वैजयन्ती माला | वेदव्यासपरिसर: |
| २. | द्वितीयपुरस्कार: | शर्मिष्ठा मिश्र: | श्री सदाशिवपरिसर: |
| ३. | तृतीयपुरस्कार: | नीता शर्मा | भोपालपरिसर: |

**१०० मीटरधावनम् (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | रतीश मोहनन् | गुरुवायूर्-परिसर: |
| २. | द्वितीयपुरस्कार: | रंजन साहा | एकलव्यपरिसर: |
| ३. | तृतीयपुरस्कार: | श्रीप्रद एम्. जोशि | राजीवगान्धीपरिसर: |

**२०० मीटरधावनम् (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | रतीश मोहनन् | गुरुवायूर्-परिसर: |
| २. | द्वितीयपुरस्कार: | रंजन साहा | एकलव्यपरिसर: |
| ३. | तृतीयपुरस्कार: | सौम्यकान्त महापात्र: | श्री सदाशिवरिसर: |

**४०० मीटरधावनम् (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | श्रीप्रद एम्. जोशि | राजीवगान्धीपरिसर: |
| २. | द्वितीयपुरस्कार: | नीलेश शर्मा | भोपालपरिसर: |
| ३. | तृतीयपुरस्कार: | सल्मान् फ़ारिश् एम्.टि | गुरुवायूर्-परिसर: |

**८०० मीटरधावनम् (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | नीलेश शर्मा | भोपालपरिसर: |
| २. | द्वितीयपुरस्कार: | तोताराम् | राजीवगान्धीपरिसर: |
| ३. | तृतीयपुरस्कार: | सामीर देव चौहान | श्री सदाशिवपरिसर: |

**१५०० मीटरधावनम् (एकमीलमितं धावनम्) (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | एम.डी. अमजद हुसेन | एकलव्यपरिसर: |
| २. | द्वितीयपुरस्कार: | रमेश वसप्प चितापुर | राजीवगान्धीपरिसर: |
| ३. | तृतीयपुरस्कार: | सूर्यकान्त चौबे | भोपालपरिसर: |

**१०० मीटरधावनम् (बालिकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | जिन्सि. अडिपरम्बिल् | गुरुवायूर्-परिसर: |
| २. | द्वितीयपुरस्कार: | काजल शर्मा | वेदव्यासपरिसर: |
| ३. | तृतीयपुरस्कार: | श्रीवल्ली वि. | राजीवगान्धीपरिसर: |

**२०० मीटरधावनम् (बालिकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | दिव्या.डि | गुरुवायूर्-परिसर: |
| २. | द्वितीयपुरस्कार: | वसुधा के. एन्. | राजीवगान्धीपरिसर: |
| ३. | तृतीयपुरस्कार: | शिल्पा शर्मा | वेदव्यासपरिसर: |

**४०० मीटरधावनम् (बालिकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | मनीषा | जयपुरपरिसर: |
| २. | द्वितीयपुरस्कार: | वसुधा के. एन्. | राजीवगान्धीपरिसर: |
| ३. | तृतीयपुरस्कार: | शिल्पा शर्मा | वेदव्यासपरिसर: |

**दूरकूर्दनम् (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | अंकित कुमार शर्मा | जयपुरपरिसर: |
| २. | द्वितीयपुरस्कार: | श्रीप्रद एम्. जोशि | राजीवगान्धीपरिसर: |
| ३. | तृतीयपुरस्कार: | रतीश मोहनन् | गुरुवायूर्-परिसर: |

**दूरकूर्दनम् (बालिकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | शिवांजलि | वेदव्यासपरिसर: |
| २. | द्वितीयपुरस्कार: | रेणुका | जयपुरपरिसर: |
| ३. | तृतीयपुरस्कार: | जिन्सि. अडिपरम्बिल् | गुरुवायूर्-परिसर: |

**उच्चकूर्दनम् (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | अजय कुमार शर्मा | जयपुरपरिसर: |
| २. | द्वितीयपुरस्कार: | सञ्जय अगस्ति | श्री सदाशिवपरिसर: |
| ३. | तृतीयपुरस्कार: | ध्रुव के. | राजीवगान्धीपरिसर: |
| ३. | तृतीयपुरस्कार: | अमलदास.पि.एम् | गुरुवायूर्-परिसर: |

**उच्चकूर्दनम् (बालिकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | काजल शर्मा | वेदव्यासपरिसर: |
| २. | द्वितीयपुरस्कार: | रेणुका | जयपुरपरिसर: |
| ३. | तृतीयपुरस्कार: | अनुसुया माहान्त | क.जे.सोमैयापरिसर: |

**गोलक्षेपणम् (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | दीपक धाकड | भोपालपरिसर: |
| २. | द्वितीयपुरस्कार: | वरुण जोशी | राजीवगान्धीपरिसर: |
| ३. | तृतीयपुरस्कार: | हरीश शर्मा | श्रीरणवीरपरिसर: |

**गोलक्षेपणम् (बालिकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | प्रिया वरियाल | वेदव्यासपरिसर: |
| २. | द्वितीयपुरस्कार: | नित्या.के.एस् | गुरुवायूर्-परिसर: |
| ३. | तृतीयपुरस्कार: | रेणुका | जयपुरपरिसर: |

**चक्रक्षेपणम् (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | शिव नारायण: | जयपुरपरिसर: |
| २. | द्वितीयपुरस्कार: | कविराज: | वेदव्यासपरिसर: |
| ३. | तृतीयपुरस्कार: | दीपक धाकड | भोपालपरिसर: |

**चक्रक्षेपणम् (बालिकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | शिल्पा शर्मा | वेदव्यासपरिसर: |
| २. | द्वितीयपुरस्कार: | निधिशा.वि | गुरुवायूर्-परिसर: |
| ३. | तृतीयपुरस्कार: | मनश्विनी सतपथी | लखनऊ-परिसर: |

**कुन्तक्षेपणम् (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | रमेश बसप्प चितापुर | राजीवगान्धीपरिसर: |
| २. | द्वितीयपुरस्कार: | प्रशान्त गोस्वामी | एकलव्यपरिसर: |
| ३. | तृतीयपुरस्कार: | विशाल शर्मा | लखनऊ-परिसर: |

**बैड्मिण्टन् (बालकानाम् एककम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | परीक्षित व्यास | जयपुरपरिसर: |
| २. | द्वितीयपुरस्कार: | देवाशिष पण्डा | क.जे. सो. परिसर: |

**बैड्मिण्टन् (बालकानां युगलम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | नवीन कुमार: | लखनऊ-परिसर: |
| १. | प्रथमपुरस्कार: | सोमदेव: | लखनऊ-परिसर: |
| २. | द्वितीयपुरस्कार: | श्रीपति भट्ट: | राजीवगान्धीपरिसर: |
| २. | द्वितीयपुरस्कार: | किशोर कुमार: | राजीवगान्धीपरिसर: |

**बैड्मिण्टन् (बालिकानाम् एककम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कार: | शिल्पा शर्मा | वेदव्यासपरिसर: |
| २. | द्वितीयपुरस्कार: | दीपिका चौधरी | जयपुरपरिसर: |








**बैड्मिण्टन् (बालिकानां युगलम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | शिल्पा शर्मा | वेदव्यासपरिसरः |
| १. | प्रथमपुरस्कारः | शिल्पा शर्मा | वेदव्यासपरिसरः |
| २. | द्वितीयपुरस्कारः | विद्यावति वि. भट्ट | राजीवगान्धीपरिसरः |
| २. | द्वितीयपुरस्कारः | भवानी आर. कुरन्द्वाड | राजीवगान्धीपरिसरः |

**हस्तकन्दुकस्पर्धा (बालकानाम्)**

१. प्रथमपुरस्कारः – निरञ्जन् के. एम्., ध्रुव के., मञ्जुनाथ आर्. भट्टः, राजेन्द्र भट्टः, सुब्राय हेच्. जे., राघवेन्द्र हेगडे, कोण्डि अनिरुद्ध राममूर्ति, श्रीपति भट्टः (राजीवगान्धीपरिसरः)

२. द्वितीयपुरस्कारः – प्रकाशकुमार नायक, चिन्मय जेना, जितेन्द्र त्रिपाठी, दीपक दाश, अश्विन कुमार पण्डा (श्रीसदाशिवपरिसरः)

**कबड्डी (बालकानाम्)**

१. प्रथमपुरस्कारः – रवि कुमार, मनोज कुमार, आशीष कुमार शर्मा, राममेहरः, रामकुमार मीना, प्रवीण कुमारः, मांगे राम, अजय कुमारः, सुनिल कुमार मीणा (जयपुरपरिसरः)

२. द्वितीयपुरस्कारः – सत्यव्रत प्रधान, गोरीशङ्कर त्रिपाठी, जयदेव मिश्र, क्रितिञ्जय विश्वाल, राजेश दीक्षितः, सुनील पाणिग्राही, सदानन्द त्रिपाठी, गोपालकृष्ण मिश्रः, शिवशङ्कर पाणिग्राही (श्रीसदाशिवपरिसरः)

**खो-खो (बालिकानाम्)**

१. प्रथमपुरस्कारः – उषा एल्. हेगड़े, त्रिदला इ. जि., वसुधा के. एन्., होलेम्मा वि. सि., निकिता जे. नायक, श्रीवल्ली वि., श्रीलक्ष्मी एम्. भट्टः, कमला हुलगप्प नेल्लूर, मैत्री सि. एम्, विद्यावति वि. भट्टः, महेश्वरी हुल्लूर (राजीवगान्धीपरिसरः)

२. द्वितीयपुरस्कारः – दिव्या.डि, जिन्सि. अडिपरम्बिल्, अर्चना. पि. ए., श्रुति.एम्.आर्, शोभिता.एम्, कृष्णेश्वरि.टि., दिव्या. पि., आतिरा.एम्. वि., सेतुलक्ष्मि.पि.एस्., नीतु.सि.एम्. अनु.पि.एस् (गुरुवायूर्-परिसरः)

**चतुरङ्गम् (बालकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | समरेन्द्र साहुः | श्री सदाशिवपरिसरः |
| २. | द्वितीयपुरस्कारः | रवि कुमार आर्य | क.जे. सो. परिसरः |
| ३. | तृतीयपुरस्कारः | चन्दन महाराना | राजीवगान्धीपरिसरः |

**चतुरङ्गम् (बालिकानाम्)**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | दुर्गा श्रीवत्सा | राजीवगान्धीपरिसरः |
| २. | द्वितीयपुरस्कारः | पुनम् जेना | श्री सदाशिवपरिसरः |
| ३. | तृतीयपुरस्कारः | वैजयन्ती माला | वेदव्यासपरिसरः |

**मल्लयुद्धम्, प्रथमः वर्गः – ५७-किलोग्राम्-पर्यन्तम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | धर्मेन्द्र सिंहः | वेदव्यासपरिसरः |
| २. | द्वितीयपुरस्कारः | चन्द्रशेखर आर्यः | भोपालपरिसरः |
| ३. | तृतीयपुरस्कारः | गौतम आर्यः | क.जे. सो. परिसरः |
| ३. | तृतीयपुरस्कारः | समरेन्द्र साहुः | श्री सदाशिवपरिसरः |

**मल्लयुद्धम्, द्वितीयः वर्गः – ६१-किलोग्राम्-पर्यन्तम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | सनीत गौड | लखनऊ-परिसरः |
| २. | द्वितीयपुरस्कारः | बलरामः | वेदव्यासपरिसरः |
| ३. | तृतीयपुरस्कारः | पुर्ण चन्द्र दाशः | श्री सदाशिवपरिसरः |
| ३. | तृतीयपुरस्कारः | अरुण शुक्ला | भोपालपरिसरः |

**मल्लयुद्धम्, तृतीयः वर्गः – ६५-किलोग्राम्-पर्यन्तम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | गौरव पटियालः | वेदव्यासपरिसरः |
| २. | द्वितीयपुरस्कारः | अजय कुमारः | जयपुरपरिसरः |
| ३. | तृतीयपुरस्कारः | लवकुश तिवारी | भोपालपरिसरः |

**मल्लयुद्धम्, चतुर्थः वर्गः – ७०-किलोग्राम्-पर्यन्तम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | अमरनाथः | वेदव्यासपरिसरः |
| २. | द्वितीयपुरस्कारः | गोपाल कृष्ण मिश्रः | श्री सदाशिवपरिसरः |
| ३. | तृतीयपुरस्कारः | पवन कुमार आर्यः | भोपालपरिसरः |
| ३. | तृतीयपुरस्कारः | विशाल शर्मा | लखनऊ-परिसरः |


**मल्लयुद्धम् पञ्चमः वर्गः – ७४-किलोग्राम्-पर्यन्तम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | अमित शर्मा | वेदव्यासपरिसरः |
| २. | द्वितीयपुरस्कारः | कमलेश कुमार सैनी | जयपुरपरिसरः |
| ३. | तृतीयपुरस्कारः | दीपक कुमार | भोपालपरिसरः |
| ३. | तृतीयपुरस्कारः | दिनेश मिश्रा | लखनऊ-परिसरः |

**मल्लयुद्धम् षष्ठः वर्गः – ८६-किलोग्राम्-पर्यन्तम्**

| | | | |
|---|---|---|---|
| १. | प्रथमपुरस्कारः | सुमित कुमारः | वेदव्यासपरिसरः |
| २. | द्वितीयपुरस्कारः | रामकुमार मीना | जयपुरपरिसरः |
| ३. | तृतीयपुरस्कारः | मुकेश शर्मा | क.जे.सोमैयापरिसरः |
| ३. | तृतीयपुरस्कारः | अशोक कुमारः | लखनऊ-परिसरः |



# राष्ट्रपतिसम्मानभाजाम् अभिनन्दनम्

भारतशासनस्य मानवसंसाधनविकामन्त्रालयेन प्रतिवर्षं प्राच्यभारतीयभाषाणां नदीष्णाः पुरस्क्रियन्ते। राष्ट्रियसंस्कृतसंस्थानम् अस्य दायित्वं निर्वहति। संस्कृत-पालि-प्राकृत-अरबी-फारसीभाषाणां संरक्षणोन्नयनविकासप्रचारेभ्यः दत्तजीवनाः तपस्विनः सम्मानिता भवन्ति। राष्ट्रपतिभवनस्य अशोकाख्ये सभागारे वैभवेन समारोहः अनुष्ठितः। कार्यक्रमेऽस्मिन् भारतदेशस्य महामहिमराष्ट्रपतयः श्रीमन्तः प्रणवमुखर्जीमहाभागाः चितान् विदुषः सम्मानपत्रेण पञ्चलक्षधनराशिना च सममानयन्। एवं एतत्परियोजनान्तर्गततया प्रदीयमानं महर्षिबादरायणव्याससम्मानपत्रं युवविद्वद्भ्यः प्रायच्छन्। सम्मानितानां विदुषां नामानि एवं सन्ति-

**२०१४तमस्य वर्षस्य राष्ट्रपतिसम्मानभाजः**

**( संस्कृतभाषायाम् )**

१. श्री मनोहर विद्यालङ्कारः, २. श्री एस् सम्बन्दशिवाचार्यः, ३. जगद्गुरुनिम्बार्काचार्यः श्रीराधासर्वेश्वरशरणदेवाचार्य श्री श्रीजी महाराजः, ४. डॉ. रमाशंकरत्रिपाठी, ५. श्री वी. कृष्णमूर्ति घनपाठीगल्, ६. श्री अरेयर श्रीराम शर्मा, ७. डॉ. रा. कृष्णमूर्तिशास्त्री, ८. डॉ. फ्रान्स्वा ग्रिमाल्, ९. श्री राजा एस्.गिरि आचार्यः, १०. प्रो. राधावल्लभत्रिपाठी, ११. श्री चेल्लं श्रीनिवाससोमयाजी, १२. प्रो. वेम्पटि कुटुम्बशास्त्री, १३. पद्मश्री प्रो. ओम्प्रकाश उपाध्यायः, १४. प्रो. डॉ. शशिप्रभा कुमारः।



२०१४तमे वर्षे राष्ट्रपतिसम्मानभाजां विदुषां समूहचित्रम्

**अन्ताराष्ट्रियसंस्कृतविद्वान्** - प्रो. प्यर्सिल्वें फिलियोज

**पालि/प्राकृत-भाषायाम्** - महोपाध्याय विनयसागरः

**२०१४तमस्य वर्षस्य महर्षिबादरायणव्याससम्मानभाजः ( संस्कृतभाषायाम् )**

१. डॉ. के.एस्. महेश्वरन्, २. डॉ. प्रमोदकुमारशर्मा, ३. डॉ. माधवजनार्दनरटाटे, ४. डॉ. विनयकुमारपाण्डेयः।

**पालि/प्राकृत-भाषायाम्** - डॉ. समणी संगीत प्रज्ञा

**२०१५तमस्य वर्षस्य राष्ट्रपतिसम्मानभाजः ( संस्कृतभाषायाम् )**

१. डॉ.(श्रीमती) शशितिवारी, २. प्रो. लक्ष्मीश्वर झा, ३. प्रो. सुधाकरदीक्षितः, ४. प्रो. जी. महाबलेश्वर भट्टः, ५. श्री एस्.एम्. वीरराघवाचार्, ६. वेदरत्नकेशवसीताराम जोगळेकरः, ७. प्रो. ए. हरिदासभट्टः, ८. पं. श्रीकृष्णशास्त्री काशिनाथशास्त्री जोशी (कोडणीकरः), ९. प्रो. रामकिशोर शुक्लः, १०. ब्रह्मश्री गुळ्ळपल्लि वेङ्कटनारायण घनपाठी, ११. प्रो. हरिदत्तशर्मा, १२. प्रो. ओम् प्रकाशपाण्डेयः, १३. डॉ. कैलाशचन्द्र दवे, १४. पं. जगन्नाथशास्त्रीतैलङ्गः, १५. डॉ. वाचस्पति मैठाणी।

**अन्ताराष्ट्रियसंस्कृतविद्वान्** - श्री आस्को पार्पोला

**पालि/प्राकृत-भाषायाम्** - प्रो. प्रद्युम्न दुबे

**२०१५तमस्य वर्षस्य महर्षिबादरायणव्याससम्मानभाजः ( संस्कृतभाषायाम् )**

१. प्रो. विरूपाक्ष वि.जड्डीपालः, २. डॉ. रत्नमोहन झा, ३. डॉ. विष्णुपदमहापात्रः, ४. डॉ. प्रसादप्रकाशजोशी, ५. डॉ. देवीप्रसादमिश्रः

**पालि/प्राकृत-भाषायाम्** - डॉ. धम्मदीप पंढरी वानखेडे



२०१५तमे वर्षे राष्ट्रपतिसम्मानभाजां विदुषां समूहचित्रम्

## ससम्मदं समाचरितः संस्कृतसप्ताहोत्सवः



पुरस्कृतच्छात्रैः सह अतिथिगणः

संस्कृतभाषा भारतीयसंस्कृतेः आधारशिला अस्ति। अस्याः भाषाया महत्त्वं विज्ञाय भारतसर्वकारेण संस्कृतसप्ताहानुपालनाय संकल्पः कृतः। तदनु राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये ०८.०८.२०१४ तः १४.०८.२०१४ पर्यन्तं हर्षेण संस्कृतसप्ताहोत्सवः समाचरितः। संस्कृतसप्ताहमुपलक्ष्य नैके कार्यक्रमाः आयोजिताः।

०८.०८.२०१४ दिनाङ्के सरस्वतीवन्दनापुरस्सरं दीपप्रज्वलनेन संस्कृतसप्ताहकार्यक्रमस्य उद्घाटनं संजातम्। तदनु विद्यालयस्तरस्य छात्राणां कृते सुभाषितकण्ठपाठस्पर्धा स्तोत्रकण्ठपाठस्पर्धा भाषणस्पर्धा च महाविद्यालयस्तरस्य छात्राणां कृते भाषणस्पर्धा च आयोजिता। आसु स्पर्धासु देहलीस्थ-विविधेभ्यः विद्यालयेभ्यः महाविद्यालयेभ्यः च समागताः छात्राः आसन्।

०९.०८.२०१४ दिनाङ्के विद्यालयस्य महाविद्यालयस्य च छात्राणां निबन्धलेखनस्पर्धा आयोजिता। स्पर्धायां महता उत्साहेन छात्राः भागं गृहीतवन्तः।

१०.०८.२०१४ दिनाङ्के मानवसंसाधनविकासमन्त्रालयः, राष्ट्रियसंस्कृतसंस्थानम्, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम् इत्येतेषां संयुक्ततत्त्वावधाने संस्कृतसप्ताहाङ्गत्वेन राष्ट्रियसंग्रहालयस्य प्रेक्षागृहे संस्कृतदिवससमारोहः अनुष्ठितः। समारोहे मुख्यातिथिपदं पाश्चात्यभारतीयविद्यायाः पारदृश्वानः द्वितीयसंस्कृतायोगस्य अध्यक्षाः आचार्याः सत्यव्रत- शास्त्रिणः मानवसंसाधनविकासमन्त्रालयस्य संयुक्तसचिवाः राष्ट्रियसंस्कृतसंस्थनस्य कुलपतयः श्री आर.पी. सिसोदियामहाभागाः आध्यक्षपदम् आवहन्त।

११.०८.२०१४ दिनाङ्के विद्वत्सपर्या कविसपर्या च समजनि। पूर्वाह्ने जाते विद्वत्सपर्याकार्यक्रमे विद्वत्तल्लजानां द्वितीयसंस्कृतायोगस्य अध्यक्षाणाम् आचार्याणां सत्यव्रतशास्त्रिणां सम्मानं व्यधायि। कार्यक्रमे चर्चयितारः इमे आसन् आचार्या दीप्तित्रिपाठी, आचार्या शशिप्रभाकुमारवर्या, आचार्यः सर्वनारायणझा, डॉ. सत्यव्रतवर्मा, प्रो. कमल आनन्दवर्या, डॉ. हुकुमसिंहः (निर्भयः) च। अपराह्ने कविसपर्याकार्यक्रमे आचार्यान् रामजीठाकुरमहाभागान् सममानयन्। अत्र आचार्यः भवेन्द्रझा, डॉ. प्रभाकिरणमहाभागा, आचार्यः सुदर्शनशर्मा, आचार्यः रामकुमारशर्मा च कविताम् अश्रावयन्।

१२.०८.२०१४ दिनाङ्के शास्त्रचर्चा आयोजिता। आचार्यः बदरीनारायणपञ्चोली, आचार्यः ब्रह्मचारी सुरेन्द्रकुमारः, आचार्यः कमलेशदत्तत्रिपाठी, आचार्यः देवनारायणझा, डॉ. धर्मेन्द्रकुमारः च शास्त्रचर्चां विदधुः।

१३.०८.२०१४ दिनाङ्के आदर्शसंस्कृतमहाविद्यालयप्राचार्यसम्मेलनं संजातम्। कार्यक्रमे मुख्यातिथिः भोगीलाललेहरचन्द्र इन्स्टीट्यूट् ऑफ इण्डोलॉजी इत्याख्यस्य निदेशकः आचार्यः गयाचरणत्रिपाठिवर्यः आसीत्।

१४.०८.२०१४ दिनाङ्के पुरस्कारप्रदानं संपूर्तिसमारोहश्च संपन्नम्। अत्र मुख्यातिथिपदं श्रीकामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य कुलपतिचरः आचार्यः ब्रह्मचारी सुरेन्द्रकुमारवर्यः, अध्यक्षपदं मानवसंसाधनविकासमन्त्रालयस्य संयुक्तसचिवः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः श्री आर.पी. सिसोदियामहाभागः आवहत्। स्पर्धासु जितेभ्यः छात्रेभ्यः पुरस्कारं च व्यतरत्। कार्यक्रमः चिन्मयमिशन्-प्रेक्षागृहे संजातः।

## सहर्षं संस्कृतसप्ताहोत्सवः अनुपालितः

संस्कृतभाषाज्ञानविज्ञानशेवधिः अस्ति। भाषायाः महत्त्वं ख्यापयितुं संस्कृतसप्ताहः समाचर्यते आभारतम्। तदनु राष्ट्रियसंस्कृतसंस्थाने संस्कृतसप्ताहोत्सवः ससम्भ्रमं २६.०८.२०१५ तः ०१.०९.२०१५ दिनाङ्कं यावत् समाचरितः।

२६.०८.२०१५ दिनाङ्के संस्कृतसप्ताहोत्सवस्य उद्घाटनसमारोहः मानवसंसाधनविकासमन्त्रालयः, राष्ट्रियसंस्कृतसंस्थानम्, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, संस्कृतविभागः दिल्लीविश्वविद्यालयः, विशिष्टसंस्कृताध्ययनकेन्द्रम् जे.एन्.यु., गोस्वामी गिरधारीलालप्राच्यविद्याप्रतिष्ठानम्, दिल्ली-संस्कृत-अकादमी, संस्कृतविभागः, एन.सी.ई.आर.टी, देववाणी परिषद्, अखिलभारतीयसंस्कृत-



संस्कृतसप्ताहोत्सवोद्घाटनस्य दृश्यम्




सम्बोधयन् माननीयराज्यमन्त्री डॉ. महेशशर्मा



पुरस्कारं गृहाणा छात्रा

प्रकाशकसंघः, अखिलभारतीयसंस्कृतपत्रकारितासंघः, दिल्लीसंस्कृतशिक्षासंघः, संस्कृतसंवर्धनप्रतिष्ठानम्, संस्कृतभारती इत्येतेषां संयुक्ततत्त्वावधाने मावलङ्करप्रेक्षागृहे संजातः। अत्र मुख्यातिथिपदं राष्ट्रियकौशलविकासनिगमस्य अध्यक्षः श्री एस्.रामदुरईमहाभागः, सारस्वतातिथिपदम् अखिलभारतीयतकनीकीशिक्षापरिषदः अध्यक्षः प्रो. अनिल डी. सहस्रबुद्धेवर्यः, अध्यक्षपदं संस्कृतमन्त्रालयस्य माननीयः राज्यमन्त्री डॉ. महेशशर्ममहाभागः च व्यभूषयन्। कार्यक्रमे संस्कृतस्य प्रचाराय प्रसाराय यतमानानां विदुषां डॉ. अम्बाकुलकर्णीमहाभागानां श्री के. लक्ष्मीनरसिंहन्महाभागानां डॉ. जयन्तकुमारदीर्घाङ्गीमहाभागानां विशिष्टसेवाव्रतिसम्मानेन पुरस्कृतिः विहिता।

२७.०८.२०१५ दिनाङ्के महाविद्यालयस्तरे अधीयानानां छात्राणां सुभाषितकण्ठपाठः, स्तोत्रपाठः भाषणस्पर्धा च आयोजिता। स्तोत्रपाठे शिवमहिम्नः स्तोत्रात् आरम्भतः विंशतिः श्लोकाः भाषणस्पर्धायां संस्कृतप्रचारस्य उपायाः इति विषयः निर्धारितः आसीत्।

२८.०८.२०१५ दिनाङ्के महाविद्यालये अध्ययनरतानां छात्राणां संस्कृतम् आधुनिकविज्ञानं च इति विषये निबन्धलेखनस्पर्धा समायोजिता। स्पर्धायां छात्राः सोत्साहं भागम् अगृह्णन्।

२९.०८.२०१५ दिनाङ्के मुख्यालयीयविद्वत्समवायः समजायत। समवायेऽस्मिन् विद्वांसः स्वाभीष्टशास्त्रीयविषयं प्रास्तुवन्।


३०.०८.२०१५ दिनाङ्के विद्यालयस्तरच्छात्राणां कृते भाषणस्पर्धा स्तोत्रकण्ठपाठस्पर्धा च समायोजि। शिवमहिम्नस्तोत्रात् आदितः दश श्लोकाः भाषणस्पर्धायां संस्कृतप्रचारस्य उपायाः इति विषयः निर्धारितः।

३१.०८.२०१५ दिनाङ्के विद्यालये अधीयानानां छात्राणां गुरुकुलशिक्षापद्धतिः इति विषयमवलम्ब्य निबन्धलेखनस्पर्धा अभवत्। एवम् अपराह्णे 'ध्रुवा बैंड' इत्याख्येन संस्कृतगानस्य प्रस्तुतिः विहिता।

०१.०९.२०१५ दिनाङ्के पुरस्कारप्रदानं संपूर्तिसमारोहश्च संपन्नम्। कार्यक्रमे मुख्यातिथिपदं राष्ट्रियसंस्कृतसंस्थानम्, संपूर्णानन्दसंस्कृतविश्वविद्यालयः श्रीसोमनाथसंस्कृतविश्वविद्यालयः इति विश्वविद्यालयत्रयस्य कुलपतिचरः प्रो. वेम्पटिकुटुम्बशास्त्रिवर्यः अध्यक्षपदं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिवर्यश्च अलमकार्षीत्। अवसरेऽस्मिन् जितेभ्यः छात्रेभ्यः पुरस्कारं व्यतरत्।

## स्वच्छताभियानम्

महात्मागान्धीवर्याणाम् आशयः आसीत् यत् सम्पूर्णं भारतं निर्मलयुक्तं भवेत्। अस्माकं परिसरः मार्गः वीथिः च स्वच्छयुक्तः स्यात्। इदम् अभियानं प्रत्येकं व्यक्तेः दायित्वं विद्यते। अतः भारतसर्वकारेण स्वच्छताभियानसप्ताहः गान्धीजन्मदिवसमुपलक्ष्य आभारतं समाचरणीयः इति सङ्कल्पः कृतः। तदनुगुणं राष्ट्रियसंस्कृत-संस्थानस्य मुख्यालये स्वच्छताभियानसप्ताहः समाचरितः।





स्वच्छतां कुर्वन्तः मुख्यालयसदस्याः

## अनौपचारिकसंस्कृतशिक्षणम्

अनौपचारिकसंस्कृतशिक्षणस्य समग्रे देशे २०१५-१६ शैक्षिकसत्रे ४६३ केन्द्रेषु १३८९० अध्येतारः लाभान्विताः संजाताः। वर्षेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानेन अखिलभारतस्तरे अनौपचारिक-संस्कृतशिक्षकाणां प्रशिक्षणस्य आयोजनं विहीतम्। तेषाम् उत्तीर्णवतां प्रशिक्षणं बेङ्गलुरुस्थे अमृताविश्वविद्यापीठे ०१ जून, २०१६ तः १६ जून २०१६ दिनाङ्कं यावत् कृतम्। शताधिकाः चिताः शिक्षकाः आधुनिकविद्यासंस्थासु अनौपचारिकसंस्कृतशिक्षणकेन्द्राणि सञ्चालयिष्यन्ति।




## सेवानिवृत्तः प्राचार्यः जि. गङ्गन्नवर्यः

राष्ट्रियसंस्कृतसंस्थानस्य पुरीस्थ श्रीसदाशिवपरिसरस्य प्राचार्यः अधिगताद्वैतवेदान्तशास्त्रः आचार्यः जि.गङ्गन्नवर्यः ३० जून २०१६ दिनाङ्के सेवानिवृत्तः सञ्जातः। परिसरस्य अभिवृद्धौ आचार्यस्य योगदानं महत्त्वपूर्णम् आसीत्। अतः आचार्यस्य अग्रिमजीवनं शुभमयं भवतु इति राष्ट्रियसंस्कृतसंस्थानपरिवारः कामयते।



## कुलपति-दैनन्दिनी

३०.१०.२०१५, ०२.११.२०१५ वेदव्यासपरिसरे आयोजिते युवमहोत्सवे भागग्रहणम्।
२१.११.२०१५ तिरुपतिस्थ-श्रीवेङ्कटेश्वरविश्वविद्यालये आयोजिते अन्ताराष्ट्रीयवेदसम्मेलने उपस्थितिः।
२६.१२.२०१५ मैसूरस्थ-जे.एस.एस. महाविद्यालयस्य संस्कृतोत्सवे आध्यक्षम्।
३०.१२.२०१५, ०२.०१.२०१६ तिरुपतिस्थ-श्रीवेङ्कटेश्वरविश्वविद्यालये आयोजिते अखिलभारतीयशास्त्रीयस्पर्धायाम् उपस्थितिः।
१७.०१.२०१६ चन्नेनल्लीस्थ-वेदविज्ञानगुरुकुलस्य उपवेशने समुपस्थितिः।
२३.०१.२०१६ उज्जैन्याम् आयोजिते शास्त्रीयवैदिकसम्मेलने उपस्थितिः।
२४.०१.२०१६ भोपालपरिसरे आयोजिते उपवेशने समुपस्थितिः।
३१.०१.२०१६ वाराणस्याः काशीहिन्दूविश्वविद्यालये आयोजितायाम् अखिलभारतीयशास्त्रीयसंगोष्ठ्याम् उपस्थितिः।
२०.०२.२०१६ रामटेकस्थ-कविकुलगुरुकालिदासविश्वविद्यालयस्य दीक्षान्तसमारोहे समुपस्थितिः।
२४-२६.०२.२०१६ त्रयोदशे संस्कृतनाट्यमहोत्सवे उपस्थितिः।
०८.०३.२०१६ श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठेन आयोजितायां संगोष्ठ्यां भागग्रहणम्।
११.०३.२०१६ राष्ट्रपतिभवने बादरायणव्यासपुरस्कारकार्यक्रमे भागग्रहणम्।
१८.०३.२०१६ एकलव्यपरिसरे प्रवृत्ते शास्त्रप्रशिक्षणवर्गस्य समापने आध्यक्ष्यम्।
३०.०४.२०१६ गुजरातस्थ-श्रीसोमनाथविश्वविद्यालयस्य प्रबन्धनसमितेः उपवेशने उपस्थितिः।
१३-१५.०५.२०१६ मध्यप्रदेशसंस्कृतविभागेन आयोजिते कार्यक्रमे समुपस्थितिः।
१६.०५.२०१६ भोपालपरिसरे सी.पी.डब्ल्यू.डि अधिकारिभिः सह उपवेशनम्।
१८.०५.२०१६ जम्मूस्थ-श्रीरणवीरपरिसरे आयोजिते कार्यक्रमे भागग्रहणम्।
०१.०६.२०१६ बेङ्गलूरुनगरे आयोजिते अनौपचारिकप्रशिक्षणवर्गस्य उद्घाटनकार्यक्रमे भागग्रहणम्।
१५.०६.२०१६ देवप्रयागे राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिनामकस्य नूतनपरिसरस्य उद्घाटनकार्यक्रमे उपस्थितिः।
०२.०७.२०१६ भोपालपरिसरे पार्लियामेंट्रि स्टेंडिग कमेटि-अधिकारिभिःसह निरीक्षणम् उपवेशनं च।

## विदुषां कार्यकलापाः

**प्रो. वासुदेवशर्मा-** जयपुरपरिसरस्य ज्योतिषविभागाध्यक्षः प्रो. वासुदेवशर्म्ममहोदयः संस्थानस्य वेदवेदाङ्गसंकायाध्यक्षरूपेण चितः, अयं १६.०७.२०१५ दिनाङ्के पदभारं गृहीतवान्।

**प्रो. भगवतीसुदेशः -** वर्षेऽस्मिन् प्रो. भगवतीसुदेशः धर्मशास्त्रविभागाध्यक्षरूपेण चितः।

**प्रो. सुदेशकुमारशर्मा -** प्रो. सुदेशकुमारशर्म्मणां संस्कृतदिवसमभिलक्ष्य राजस्थानसर्वकारद्वारा सम्माननम्। अथ च संस्थानपरिचायिकायाः (२०१५-१६) निर्माणसमितेः संयोजकरूपेण चितः।

**डॉ. हरिप्रसादः के -** २०१५ फेब्रवरीमासे कर्नाटकराज्यमुक्तविश्वविद्यालयेन सञ्चालितायां अन्ताराष्ट्रियसंगोष्ठ्यां "Inclusive Education" इति विषये शोधपत्रं प्रास्तौत्। २०१५ जुलैमासे जे.सि.बि.एम्, कलाशालायां सञ्चालितायां राष्ट्रियसंङ्गोष्ठ्यां "ऋणविमुक्तेः विमर्शः" इति विषयमवलम्ब्य शोधपत्रं समार्पयत्।

**डॉ. गणेश पण्डितः -** डिसेम्बर मासे १०-१३ पर्यन्तं गोवाराज्ये तपोभूमौ प्रवृत्ते अन्ताराष्ट्रियसंस्कृतसम्मेलने भागग्रहणं पत्रप्रस्तुतिं सत्रसञ्चालनञ्च अकरोत्।

**सि हेच् के पद्मनाभम् -** २०१५ जनवरिमासे आन्ध्रेषु अमलापुरे, पीठापुरे, विशाखपट्टणे शारदापीठे च प्रवृत्तासु वाक्यार्थसभासु वाक्यार्थाः प्रस्तुताः। तिरुपतिस्थवैदिकविश्वविद्यालये मार्चमासे प्रवृत्तराष्ट्रिसङ्गोष्ठ्यां वाक्यार्थः कृतः। तिरुपतिस्थे राष्ट्रियसंस्कृतविद्यापीठे E-Text पाठ्यनिर्माणाङ्गतया अष्टौ सचित्रध्वनिपाठाः पाठिताः। पुणे विश्वविद्यालये मार्चमासे प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां वाक्यार्थः कृतः। महागणपतिवाक्यार्थसभायां शृङ्गेरीशारदापीठे सञ्चालितायां वाक्यार्थः कृतः।

**डॉ.राजेशकुमारशुक्लः -** पूर्णप्रज्ञमहाविद्यालये प्रवृत्तायां विश्वविद्यालय-अनुदान-आयोगप्रायोजितायां द्विदिवसीयराष्ट्रियसङ्गोष्ठ्याम् "हिन्दी भाषा का भूमण्डलीकरण और नवीन चुनौतियाँ" इति विषये शोधपत्रं प्रास्तौत्।

**डॉ. प्रमोद कुमार बुटोलिया** – २०१५ तमस्य दिसम्बरमासस्य एकविंशतिदिनाङ्कात् त्रयोविशंतिदिनाङ्कपर्यन्तं जयपुरपरिसरे प्रवृत्तायां संगोष्ठ्यां भागग्रहणं पत्रपठनञ्च। ३०.११.२०१५ दिनाङ्के राजीवगान्धीपरिसरे प्रवृत्तसंविधानविषयकराष्ट्रियसंगोष्ठ्यां 'भारतसंविधानस्य आलोचनात्मकविमर्शः' इति विषये पत्रं प्रास्तौत्।

**डॉ. सूर्यनारायणभट्टः** – २७.७.१५ अगस्टमासे राजीवगान्धीपरिसरे आयोजितवाक्यार्थसभायां 'प्रतिषेधपर्युदासौ' इति विषये वाक्यार्थोपस्थितिः। ५.८.२०१५ शृङ्गगिरौ जे.सी.बी.एम् कलाशालायां यू.जी.सी. धनसाहाय्येन समायोजितराष्ट्रस्तरसंगोष्ठ्यां शोधपत्रोपस्थानम्। ७.१.१५ दिनाङ्के उम्मचगि महापाठाशालायां समायोजितसंस्कृतोत्सवे विशेषोपन्यासः। १८ तः २१ नवम्बर् २०१५ दिनाङ्केषु तिरुपतिस्थवैदिकविश्वविद्यालये समायोजितयामन्ताराष्ट्रियसङ्गोष्ठ्यां 'वेदेषु कृषिविज्ञानम्' इति विषयकं शोधपत्रोपस्थापनम्। नवम्बर २६ दिनाङ्के परिसरे मीमांसाविभागे समायोजितायाः राष्ट्रियसङ्गोष्ठ्याः संयोजकत्वं पत्रप्रस्तुतिश्च।

**डॉ. नवील होळळः** – १) २८.६.२०१५ तः २.७.२०१५ पर्यन्तं बांकाक्नगरे प्रवृते विश्वसंस्कृतसम्मेलने शास्त्रार्थचर्चायां भागमग्रहीत्। 'उपमानप्रामाण्यम्' इति विषये वाक्यार्थं च उपास्थापयत्। भाद्रपदशुक्लचतुर्थीतः पूर्णिमां यावत् शृङ्गेरीश्रीशारदापीठे प्रवृत्तायां महागणपतिवाक्यार्थसभायां वाक्यर्थमुपास्थापयत्। २२.१२.२०१५ दिनाङ्के तिरुपतौ राष्ट्रियसंस्कृतविद्यापीठे 'हेत्वाभास' इति विषयमधिकृत्य पट्टाभिरामशास्त्रिव्याख्यानमालाङ्गतया न्यायव्याख्यानं प्रादात्।

**डॉ. प्रमोद भट्टः** – २९.१.२०१५ तमे दिनाङ्के राजीवगान्धीपरिसरे प्रचालिताध्यापकवाक्यार्थपरिषदि "भाव्यमानेन सवर्णानां ग्रहणं न" इति विषये वाक्यार्थं प्रास्तावीत्। २४.०२.२०१५ तः २६.०२.२०१५ पर्यन्तं गोवानगरे प्रचालिते अन्ताराष्ट्रियसंस्कृतमहासम्मेलने "अदसो मात्" इति सूत्रविषये वाक्यार्थम् अकरोत्। राष्ट्रियसंस्कृतसंस्थाने मुख्यालये नवदेहल्यां प्रवृत्तायां दूरस्थशिक्षापाठलेखनकार्यशालायां ११.०६.२०१५ तः १९.०६.२०१५ दिनाङ्कं यावत् भागं गृहीतवान्। वेदशास्त्रोत्तेजकसभापुणे द्वारा प्रचाल्यमानासु शास्त्रीयपरीक्षासु पुराणेतिहासे परीक्षामुत्तीर्य 'पुराणचूडामणिः' इति बिरुदं ०१.११.२०१५ तमे दिनाङ्के प्राप्तवान्। वेदशास्त्रोत्तेजकसभा पुणे द्वारा प्रचाल्यमानासु शास्त्रीयपरीक्षासु वेदान्तशास्त्रे परीक्षामुत्तीर्य 'वेदान्ताभिज्ञः' इति बिरुदेन ०१.११.२०१५ तमे दिनाङ्के सभया सम्मानितः।

**आचार्यः सुब्रायभट्टः** – २८.०६.२०१५-०२.०७.२०१५ पर्यन्तं षोडशे विश्वसंस्कृतसम्मेलने शास्त्रचर्चायां भागः गृहीतः - (थैल्याण्ड राष्ट्रस्य ब्याङ्काक् नगरे)। १७.०९.२०१५ तः २९.९.२०१५ पर्यन्तं शृङ्गेरीश्रीशारदापीठे श्रीमहागणपतिवाक्यार्थविद्वत्सभायां भागं गृहीत्वा मीमांसाशास्त्रे वाक्यार्थः उपस्थापितः। ३१.१०.२०१५ दिनाङ्के-चन्नै नगरे कुप्पुस्वामिशोधसंस्थायां -'मीमांसाशास्त्रे ईश्वरः' इत्यस्मिन्विषये प्रबन्धः उपस्थापितः। २६.११.२०१५ दिनाङ्के-राजीवगान्धीपरिसरे राष्ट्रियसङ्गोष्ठ्यां प्रकरणान्तरात् कर्मभेदः इति विषये प्रबन्धः उपस्थापितः। १४.१२.२०१५ दिनाङ्के-स्वर्णवल्लीमठे वैदिकसङ्गोष्ठ्यां "बोधायनीयपूर्वप्रयोगे मीमांसान्यायानां समन्वयः" इति विषये प्रबन्धः उपस्थापितः। १९.१२.२०१५ तः २५.१२.२०१५ दिनाङ्केषु-मैसूरू दत्तपीठे राष्ट्रियविद्वद्गोष्ठ्यां शास्त्रार्थः उपस्थापितः। ३०.१२.२०१५ तः ४.१.२०१६-पर्यन्तदिनेषु शकटपुरबदरीशङ्कराचार्यमठे विद्वद्गोष्ठ्यां वाक्यार्थः उपस्थापितः।

**डॉ.चन्द्रकान्तः** – मार्चमासे ६-७ दिनाङ्कयोः समावेशितशिक्षाविषये कर्णाटकराज्यमुक्तविश्वविद्यालयेन मैसूरूनगरे समायोजितायाम् अन्ताराष्ट्रियसङ्गोष्ठ्यां समावेशितशिक्षाविषये सौविध्यस्य वैशिष्ट्यानि इति विषये शोधपत्रं प्रास्तौत्। अगस्टमासस्य २२-२३ दिनाङ्कयोः-योगदर्शनविषये कर्णाटककलामहाविद्यालये धारवाडनगरे सम्पन्नायां राष्ट्रियसङ्गोष्ठ्यां तत्र भागग्रहणं पत्रप्रस्तावश्चाकरोत्। योगद्वारा अधिगन्तॄणां स्वास्थ्यसंरक्षणम् इति विषये पत्रं प्रास्तौत्। नवम्बर मासे १८ तः २१, २०१५ पर्यन्तम् अन्ताराष्ट्रिय-संगोष्ठी-वेदविज्ञानविषये श्री वेङ्कटेश्वरवेदविश्वविद्यालये तिरुपतौ समजायत। तत्र भागग्रहणं पत्रपठनञ्चाकारि। विषयः-वेदेषु पर्यावरणविज्ञानशिक्षा। डिसम्बरमासे २४ तः २६ पर्यन्तं-"भारतीयसंस्कृतौ नारी" इति विषये इतिहाससङ्कलनयोजना, ऐसिएच् आर, शिक्षायाः प्रादेशिकसंस्था मैसूरू (RIE) इति त्रिभिः संस्थाभिः समायोजितायां शोधपत्रं समर्पितम्। डिसम्बर २२, २०१५ कर्णाटकसंस्कृतविश्वविद्यालयद्वारा-सि.जि.पुरूषोत्तमपुस्तकपुरस्कारः प्रदत्तः।

**आचार्या इन्दिरा.पि** – विश्वसंस्कृतसम्मेलने - भागग्रहणम्। राष्ट्रियसंगोष्ठी, साहित्यविभागस्य - राष्ट्रियसंस्कृतसंस्थानम्, गुरूवायूर-परिसरे आध्यक्ष्यं, शोधपत्रप्रस्तुतिश्च। राष्ट्रियसंगोष्ठी, व्याकरणविभागस्य - राष्ट्रियसंस्कृतसंस्थानम्, गुरूवायूर-परिसरे, शोधपत्रप्रस्तुतिः। राष्ट्रियसंगोष्ठी - केरलसर्वकारीयसंस्कृलाशालायां, तिरूवनन्तपुरम्, आध्यक्ष्यं, शोधपत्रप्रस्तुतिः। राष्ट्रियसंगोष्ठी - राष्ट्रियसंस्कृत-संस्थानम्, मुम्बईपरिसरे, शोधपत्रप्रस्तुतिः।

**डॉ.राघवेन्द्र भट्टः** – काव्यप्रस्तुतिः - शृङ्गेरीशारदापीठे प्रवृत्तकविसम्मेलने-जनवरी, २०१५। प्राश्निकः - शृङ्गेरीशारदापीठे प्रवृत्ते अष्टावधाने-जनवरी, २०१५। सहनिर्देशनम् - 'बालभारतम्' नाटयोत्सवः-दिल्ली-फेब्रवरी, २०१५। विशिष्टव्याख्यानम् - 'शाकुन्तले आश्रमधर्माः' आर्षविद्याकेन्द्रम्, शृङ्गेरी-मार्च- २०१५। संयोजकः - UGC-राष्ट्रियसङ्गोष्ठी JCBM College, Sringeri. शोधपत्रप्रस्तुतिः - UGC-राष्ट्रियसंङ्गोष्ठी JCBM College, Sringeri विषयः-'काव्यरचनायाम् आधुनिकपद्धतौ प्रादेशिकभाषाव्यवहारस्य प्रभावः'। प्राश्निकः - अष्टावधानम्-कुन्दपुरम्, अक्टोबर् २०१५। शोधपत्रप्रस्तुतिः - राष्ट्रियसंगोष्ठी-

के.जे.सोमय्याविद्यापीठम्, मुम्बई विषय:- संस्कृतरूपकेषु आस्वादोपयोगितया वाचिकाभिनयस्य निर्वाह:, डिसेम्बर २०१५। वाक्यार्थ: - भट्ट्लोल्लट्मतम्। शास्त्रगोष्ठी-'रसजिज्ञासा' श्रीकालभैरवेश्वर- संस्कृतमहाविद्यालय:, आदिचुञ्चनगिरि: डिसेम्बर्-२०१५

**श्री रवीशः एन्.** - आन्तरिक गुणवत्ता मूल्याङ्कन समिति द्वारा आयोजतकार्यशालायां १७.१२.२०१५ त: १९.१२.२०१५ तमदिनाङ्कं यावत् भागग्रहणम्।

**श्री मुरलिकृष्णः** - २९.०१.२०१५ तमे दिनाङ्के शृङ्गेरिस्थस्य राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरे प्रवृत्तायां वाक्यार्थपरिषदि अङ्कपाश: इत्यस्मिन् विषये वाक्यार्थं प्रास्तौत्। १४-१५ फेब्रवरी २०१५ तमयो: दिनाङ्कयो: गिरिनगरस्थे अक्षरे प्रवृत्तायां संस्कृतविकिपीडियाकार्यशालायां भागमगृह्णात्। ५, ६, १० तथा १२.०८.२०१५ तमेषु दिनाङ्केषु जम्मूस्थस्य राष्ट्रियसंस्कृतसंस्थानस्य श्रीरणवीरपरिसरे विद्यावारिधिच्छात्रेभ्य: प्रवृत्तायां कार्यशालायां हस्तलेखशास्त्रविषयम् उदबोधयत्। २६.१२.२०१५ त: आरभ्य २९.१२.२०१५ पर्यन्तं केरलराज्यस्थ-त्रिपुणित्तुरप्रदेशे सर्वकारीयसंस्कृतमहाविद्यालये प्रवृत्तायां राष्ट्रस्तरीयशास्त्रार्थसदसि भारतीयगणितशास्त्रे अङ्कपाशस्य वैशिष्ट्यम् इत्यस्मिन् विषये वाक्यार्थं समुपास्थापयत्। ०७.०१.२०१६ तमे शृङ्गेरिस्थस्य राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरे प्रवृत्तायां भूधिष्ण्यग्रहसंस्थानविमर्श: इत्याख्यायां ज्योतिश्शास्त्रीयराष्ट्रियसङ्गोष्ठ्यां भागमवहत्।

**डॉ. वेङ्कटरमणभट्टः** - २२.०८.२०१५ तथा २३.०८.२०१५ दिनाङ्कयो: धारवाडस्थे कर्णाटकमहाविद्यालये प्रवृत्तायां योगविषयकराष्ट्रियसङ्गोष्ठ्यां योगदर्शनं तस्य उद्गमश्च इति विषये पत्रं प्रास्तौत्। अगस्टमासे राजीवगान्धीपरिसरे प्रवृत्ताध्यापक-वाक्यार्थपरिषदि पाठयोजना इति विषये वाक्यार्थं कृतवान्। ३०.११.२०१५ दिनाङ्के राजीवगान्धीपरिसरे प्रवृत्तसंविधानविषयकराष्ट्रिय-सङ्गोष्ठ्यां 'भारतसंविधाने अम्बेडकर् वर्यस्य योगदानमिति विषये पत्रं प्रास्तौत्।

**डॉ.रा.बालाजी** - ३१.१.२०१५ दिनाङ्के 'काञ्चीकामकोटिपीठम्, पिनपुरम्' इत्यस्मिन् क्षेत्रे प्रचलितराष्ट्रियसंगोष्ठ्यां भागग्रहणं कृतम्। ५-६ मार्च २०१५ दिनाङ्कयो: शङ्करमठम्, विशाखपट्टणम् इत्यत्र सम्पन्नायां शास्त्रराष्ट्रियसंगोष्ठ्यां भागग्रहणं कृतम्। २२-२३ अगस्त २०१५ कर्णाटककलाशालायां, धार्वाडमध्ये प्रचलितायां योगसम्बद्धराष्ट्रियसंगोष्ठ्यां भाग: स्वीकृत:। १८-२१ नवम्बर २०१५ श्रीवेङ्कटेश्वरविश्वविद्यालये, अन्ताराष्ट्रियसंङ्गोष्ठ्यां भाग: स्वीकृत:। २४-२६ दिसम्बर २०१५ मानसगङ्गोत्रीमध्ये, मैसूरे दशमराष्ट्रियसंगोष्ठ्यां भागं स्वीकृतवान्।

**डॉ.चन्द्रकला कोण्डिः** - जुलै मासे शृङ्गेरीस्थ जगद्गुरूचन्द्रशेखरभारतीमहाविद्यालये प्रवृत्तायाम् आधुनिककाव्यविषयकराष्ट्रियसङ्गोष्ठ्यां "मर्कटोपदेशकाव्यस्य विमर्श:" इति विषये पत्रं प्रास्तौत्। अगस्तमासे धारवाडस्थे कर्णाटकमहाविद्यालये प्रवृत्तायां "योग" विषयकराष्ट्रियसङ्गोष्ठ्याम् "महाभारतेऽष्टाङ्गयोग:" इति विषये पत्रं प्रास्तौत्। डिसेम्बरमासे मैसूरूनगरे प्रवृत्तायां महिलाविषयक-राष्ट्रियसंङ्गोष्ठ्यां "द्रौपद्या: नारीत्वस्य परिपूर्णता" इति विषये पत्रं प्रास्तौत्।

**आचार्यः महाबलेश्वर पी.भट्टः** - २३.४.२०१५ कालट्यां श्रीशङ्कराचार्यजयन्त्युत्सवे वाक्यार्थसभायां भाग: स्वीकृत: वाक्यार्थश्च प्रास्तावि। कालट्यां संस्कृतविश्वविद्यालये वेदान्तविभागपक्षत: द्विदिवसीयराष्ट्रियसंगोष्ठ्यां भाग: स्वीकृत:। अगस्टमासे वेदान्तभारत्याख्यया शोधसंस्थया आयोजितायां वेदान्तचिन्तनगोष्ठ्यां भाग: स्वीकृत: जापदकट्टे क्षेत्रे। राजराजेश्वरीसंस्कृतमहापाठशालायाम् आयोजितायां शास्त्रगोष्ठ्यां भाग: स्वीकृत:।

**डॉ. गणेश ईश्वरभट्टः** - शृङ्गेरीशारदापीठे सद्विद्यासञ्जीविनीसंस्कृतमहापाठशालाया: अमृतमहोत्सवस्य अङ्गतया २४.१.२०१५ तमे दिनाङ्के आयोजितायां कविगोष्ठ्यां भागमूढ्वा स्वीयकविता: प्रास्तौत्। ३०.१.२०१५ तमे दिनाङ्के बेङ्गलूरुनगरे धर्मजागृतिसंस्थया आयोजिते अन्ताराष्ट्रियवेद- विज्ञानसम्मेलने शोधपत्रं प्रास्तौत्। १७.०३.२०१५ तमे दिनाङ्के धर्मस्थलक्षेत्रे ब्रह्मकलशोत्सवाङ्गतया आयोजितायां सभायाम् धार्मिकोपन्यासं प्रादात्। ०२.०८.२०१५ तमदिनाङ्कात् ०४.०८.२०१५ तमदिनाङ्कपर्यन्तं कृष्णराजनगरस्थया वेदान्त-भारतीसंस्थया आयोजितायां वेदान्तशास्त्रसभायां भागमगृह्णात्। शृङ्गेरीस्थे जे सि बि एम् कलाशालायां ०७.०८.२०१५ तमे दिनाङ्के सम्प्रवृत्तायां कविगोष्ठ्यां भागमूढ्वा स्वीयकविता: प्रास्तौत्। तत्रैव ०८.०८.२०१५ तमे दिनाङ्के राष्ट्रियसङ्गोष्ठ्यां स्वीयं शोधपत्रं प्रास्तौत्। १७.०८.२०१५ तमदिनाङ्कात् २९.०८.२०१५ तमदिनाङ्कपर्यन्तं शृङ्गेरीशारदापीठे जगद्गुरूणां सन्निधौ प्रवृत्तायां महागणपतिवाक्यार्थसभायां वेदान्तशास्त्रे वाक्यार्थविचारं प्रास्तौत्। १८.११.२०१५ तमे दिनाङ्के गुरुवायूरूपरिसरे आयोजितायां वेदान्तशास्त्रविषयिण्यां राष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रास्तौत्।

**डॉ.एस्. वेङ्कटेशताताचार्यः** - १७.०३.२०१५ तमे दिनाङ्के - श्रीवेङ्कटेश्वरवेदविश्वविद्यालये, तिरुपतौ प्रवृत्तायां - राष्ट्रियसंगोष्ठ्यां जातिशक्तिवादे पत्रप्रस्तुतिम् अकरोत्। ६.६.२०१५ तमे दिनाङ्के - ब्रह्मोत्सव:, श्रीश्रीनिवासस्वामिदेवस्थानम्, नावल्पाक्कं, वन्दवाशी, तमिलनाडु इत्यत्र प्रवृत्तस्य ब्रह्मोत्सवस्य सन्दर्भे - दहराधिकरणम् इति विषये वाक्यार्थमकरोत्। १३.०६.२०१५ तमे दिनाङ्के - विद्वत्सभा, श्री अहोबिलमठे, विद्वत्सभायां - समुदायाधिकरणम् इति विषये वाक्यार्थमकरोत्। २३.०६.२०१५ तमे दिनाङ्के - मेलुकोटेस्थसंस्कृतानुसन्धानपरिषदि - उपलब्ध्यधिकरणम् इति विषये वाक्यार्थ:। ११.१२.२०१५ तमे दिनाङ्के - बेङ्गलूरुनगरे - श्रीसीतारामाञ्जनेयवेदपाठशालायां "शास्त्ररत्नम्" इति बिरूदेन सम्मानित:। १९-२०.१२.२०१५ दिनाङ्के - मैसूरस्थे अवधूतदत्तपीठे - वैश्वदेवाधिकरणमितिविषये वाक्यार्थमकरोत्।

**आचार्यः सि.एच्.एन.भि. प्रसादराव्** – विभागस्य आचार्यः सि.एच्.एन.भि. प्रसादराव् (अ.वे.विभागः, सदाशिवपरिसरः) रोटारिश्रीक्षेत्रपक्षतः सेप्टेम्बरमासस्य ५ दिनाङ्के सम्मानितः। तिरुपतिस्थे राष्ट्रियसंस्कृतविद्यापीठे आयोजितायां राष्ट्रियगीतासंगोष्ठ्यां साभापत्यं (Chair Person) निरवहत्।

**डॉ. भगवान् सामन्तरायः** – याजपुरस्थे साधुगौडेश्वरमहाविद्यालये विभागस्य सम्मानितिथित्वेन निमन्त्रितः, तत्र च राष्ट्रियसंगोष्ठ्यां 'आधुनिकसमाजे संस्कृतवाङ्मयस्यावश्यकता' इति शीर्षकोपेतं प्रबन्धं पठितवान्। श्रीसदाशिवपरिसरे व्याकरणसर्वदर्शनविभागाभ्याम् आयोजितयोः राष्ट्रियसंगोष्ठ्योः भागं गृहीत्वा शोधपत्रं पठितवान्।

**डॉ. दयानन्दपाणिग्राही** – निर्माल्यफाउण्डेशन्, पुरी, पक्षतः श्रीसदाशिवपरिसरपक्षतः च समायोजितायां राष्ट्रियसंगोष्ठ्यां भागमुदवहत् शोधपत्रं पठितवान् च।

**डॉ. महेशझा** – सदाशिवपरिसरे जनवरीमासे समायोजितायां राष्ट्रियसङ्गोष्ठ्यां वेदेषु पर्यावरणस्वच्छताविषये शोधपत्रं प्रस्तुतवान्। इलाहाबादविश्वविद्यालये २.१२.२०१५ तः २२.१२.२०१५ पर्यन्तं पुनश्चर्यापाठ्यक्रमे भागमगृह्णात्। साहित्यविभागे प्रचलितायां राष्ट्रियसङ्गोष्ठ्यां अक्टोबरमासे जातीयचर्च्चासत्रे शोधपत्रं प्रास्तौत्।

**डॉ. गणपतिशुक्लः** – शृङ्गेरिशङ्कराचार्य्यमठे सेप्टेम्बरमासे न्यायशास्त्रार्थे भागं गृहीतवान्, पुर्यां डिसेम्बरमासे निर्माल्यसंस्थापक्षतः प्रवृत्ते जातीयालोचनाचक्रे शोधपत्रम् उपस्थापितवान् च। श्रीसदाशिवपरिसरे नवम्बरमासे आयोजितायां पाण्डुलिपिशोधप्रविधिकर्मशालायां व्याख्यानं प्रस्तुतवान्।

**डॉ. कुञ्जविहारिद्विवेदी** – तिरुपतौ श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालये नवम्बरमासे आयोजिते अन्ताराष्ट्रियसम्मेलने शोधपत्रं प्रास्तौत्।

**डॉ. पीताम्बरमिश्रः** – परिसरस्य साहित्यविभागेन आयोजिते चर्च्चासत्रे भागी आसीत्। एवं च पुरीनगरे निर्माल्यसंस्थापक्षतः आयोजिते चर्च्चासत्रे शोधपत्रं पठितवान्।

**आचार्यः अतुलकुमारनन्दः** – तिरुपतिस्थे राष्ट्रियसंस्कृतविद्यापीठे आयोजिते आलोचनाचक्रे आधारपुरुषरूपेण भागमगृह्णात्। झारखण्डप्रदेशान्तर्गते देवघरमण्डलस्थिते आदर्शसंस्कृतमहाविद्यालये मलमासोपरि विशिष्टव्याख्यानं मुख्यवक्तृरूपेण अकरोत्।

**डॉ. मनोजकुमारसाहुः** – श्रीजगन्नाथसंस्कृतविश्वविद्यालये धर्मशास्त्रविभागेन आयोजिते धर्मशास्त्रीयराष्ट्रियचर्च्चासत्रे शोधप्रबन्धं पठितवान्।

**आचार्यः सूर्यमणिरथः** – जून्मासस्य अन्तिमसप्ताहे विश्वसंस्कृतसम्मेलने योगदानाय ब्याङ्कक्नगरीं प्रति गतवान्, अपि च राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईपरिसरे आयोजिते नाट्यशास्त्रोपरि चर्च्चासत्रे आधारपुरुषरूपेण योगदानं कृतवान्। पुरीनगरे सामाजिक-सांस्कृतिक-कार्यविधायिनी निर्माल्यमिति संस्था आचार्यसूर्यमणिरथं सम्मानितवती।

**डॉ. उदयनाथझा** – दरभङ्गास्थिते मिथिलाविश्वविद्यालये पीएच.डि परीक्षायां परीक्षकत्वेन भागी आसीत्, अपि च मिथिलासांस्कृतिकपरिषदानुकूल्येन भुवनेश्वरे नवम्बरमासे आयोजिते चर्च्चासत्रे मुख्यवक्तृत्वेन योगदानं कृतवान्। डिसेम्बरमासे बिहारराज्यस्य पर्यटनमन्त्रालयपक्षतः पटनानगरे आयोजिते उग्रतारामहोत्सवे मण्डनमिश्रोपरि आयोजिते चर्च्चासत्रे विशिष्टवक्तृत्वेन भागी आसीत्।

**डॉ. सुशान्तकुमारराजः** – अक्टोबरमासे मध्यप्रदेशस्य विदिशामण्डलस्थिते शासकीयसञ्जयगान्धिस्मृतिस्नातकोत्तरमहाविद्यालये संस्कृतविभागेन आयोजिते आलोचनाचक्रे मुख्यातिथिरूपेण भागमग्रहीत्।

**आचार्यः हरेकृष्णमहापात्रः** – वाराणसीस्थहिन्दूविश्वविद्यालये वेदवेदाङ्गविभागे डिसेम्बरमासे शब्दस्वरूपविमर्शः इति विषयमधिकृत्य विशिष्टं व्याख्यानं प्रादात्। हिमाचलप्रदेशस्थवेदव्यासपरिसरे गते डिसेम्वरमासे सम्पन्नायां सांख्ययोगायुर्वेदविषयिण्यां संगोष्ठ्यां विशेषज्ञरूपेणोपस्थाय स्वकीयं वक्तव्यमुपास्थापयत्। संस्थानपक्षादायोजितायां पाण्डुलिपिविज्ञानशोधप्रविधिकार्यशालायां नवम्बरमासे २.११.२०१५ तः ३०.११.२०१५ दिनाङ्कं यावत्संयोजकदायित्वमुदवहत्। परिसरस्य दर्शनविभागे पुराणविभागे च संगोष्ठ्यां विशेषज्ञरूपेणाऽपि भागमगृह्णात्।

**आचार्यः अनुपमापृष्टिः** – संस्थानस्यान्तर्वीक्षासमित्या प्रोन्नतिं प्राप्य आचार्यपदे न्ययुज्यत इति हर्षस्य विषयः।

**डॉ. उमेशचन्द्रमिश्रः** – नियालिस्थिते स्वयंशासितमहाविद्यालये दिसम्बरमासे विशिष्टं व्याख्यानमदात्।

**श्री गणेश्वरझाः** – शृङ्गेरीनगर्यां शास्त्रार्थसभायां भागं गृहीत्वा विशिष्टपुरस्कारेण सभाजितः।

**आचार्यः दुर्गाचरणषडङ्गी** – परिदर्शकाचार्यरूपेण गते डिसम्बरमासे सप्ताहं यावत् श्रीजगन्नाथसंस्कृतविश्वविद्यालयमगच्छत्। साधुगौडेश्वर-संस्कृतमहाविद्यालये आयोजिते चर्च्चासत्रे मुख्यवक्तृत्वेन समुपातिष्ठत्।

**आचार्या दाशगौरप्रिया** – दिसम्बरमासे शोधप्रबन्धस्य वाक्परीक्षिकारूपेण बनारसहिन्दूविश्वविद्यालयस्य विद्याधर्मदर्शनविभागेन निमन्त्रिता आसीत्।



राज्यस्तरीयशास्त्रीयस्पर्धोद्घाटनसत्रस्य एकं दृश्यम्

# भोपालपरिसरवार्ता:

### राज्यस्तरीय-शास्त्रीय-स्पर्धा ( २०१४-२०१५ )

६ जनवरीत: ७ जनवरी २०१५ पर्यन्तं भोपालपरिसरे मध्यप्रदेश-छत्तीसगढयो: राज्यस्तरीय-शास्त्रीय-स्पर्धा आयोजिता अभवत्। अस्यां स्पर्धायाम् उभाभ्यां राज्याभ्यां पञ्चाशदधिका: छात्रा: ज्योतिष-साहित्य-व्याकरण-वेदान्त-पुराणेतिहास-मीमांसा-न्यायप्रभृतिषु विभिन्नशास्त्रेषु शलाकास्पर्धायां भाषणप्रतियोगितायाम् अष्टाध्यायी-धातुरूप-काव्यकण्ठ-पाठादिस्पर्धासु च भागं गृहीतवन्त:। स्पर्धासु निर्णायकत्वेन परिसरीयप्राध्यापकै: सह आचार्या: आजादमिश्र-बोधकुमारझा-हरेरामत्रिपाठी-रैदास-बालकृष्णशर्मा-क्षेत्रवासीपण्डा-एच.पी.दीक्षित-लक्ष्मीनारायणपाण्डेय- रघुनाथप्रसादगोस्वामिप्रभृतय: बाह्यविद्वांस: समुपस्थिता आसन्। तत्कालिकपरिसरप्राचार्यस्य परमेश्वरनारायणशास्त्रिण: आध्यक्ष्ये कार्यक्रमोऽयं सम्पन्नोऽभवत्।



नाट्यमहोत्सवे प्रथमपुरस्कारभाज: छात्रा:

### द्वादशे अखिलभारतीयसंस्कृतनाट्यसमारोहे प्रथमस्थानम्

राष्ट्रियसंस्कृतसंस्थाननवदेहलीद्वारा समायोजिते द्वादशे अखिलभारतीयसंस्कृतनाट्यसमारोहे भोपालपरिसरेण प्रथमं स्थानं सम्प्राप्तम्। तत्र भोपालपरिसरेण कृतस्य **मालतीमाधवम्** इति नाटकस्य निर्देशनार्थं डॉ. धर्मेन्द्रकुमारसिंहदेव: सर्वश्रेष्ठनिर्देशकस्य पुरस्कारं प्राप्तवान्।

### संस्कृतभाषालेखन-सम्भाषणकौशलविकासकार्यशाला

भोपालपरिसरस्य ज्योतिषविभागस्य तत्त्वावधाने छात्राणां संस्कृतभाषायां लेखनकौशलस्य सम्भाषणकौशलस्य च विकासाय १६ जनवरीत: ०५ फरवरी २०१५ पर्यन्तं २१ दिवसीय-संस्कृतभाषालेखन-सम्भाषणकौशलविकासकार्यशाला समायोजिता। कार्यशालाया: अध्यक्ष: प्रो. भारतभूषणमिश्र: संयोजकश्च डॉ. नीलमाधवदाश: आसीत्। प्रशिक्षकेषु आचार्य-हंसधरझा-डॉ. अशोकथपलियाल-डॉ. डम्बरुधरपति-डॉ. नीलमाधवदाशा: प्रमुखा: आसन्।

### गणतन्त्रदिवससमारोह:

२६ जनवरी २०१५ दिनाङ्के भोपालपरिसरे गणतन्त्रदिवससमारोह: तत्कालिकपरिसर-प्राचार्यस्य परमेश्वरनारायणशास्त्रिण: आध्यक्ष्ये ध्वजारोहणपूर्वकं समायोजित:। परिसरप्राचार्येण स्वोद्बोधने गणतन्त्रदिवसस्य प्रासङ्गिकतां प्रदर्श्य भारतदेशस्य गौरवाभिवृध्यर्थं छात्रा: अभिप्रेरिता:। कार्यक्रमे छात्रै: शिक्षकैश्च देशभक्त्युद्दीपिका: रचना: प्रस्तुता:।



ज्योतिषवास्तुपाठ्यक्रमोद्घाटनस्य किञ्चन् दृश्यम्

### भारतीयफलितज्योतिष-वास्तुशास्त्रपरिचयपाठ्यक्रमयो: सञ्चालनम्

भोपालपरिसरस्य ज्योतिषविभागेन समाजस्य विभिन्नवर्गाणां प्रबुद्धज्योतिषानुरक्तानां जनानां कृते ज्योतिषशास्त्रवास्तुशास्त्रयो: परिचयप्रदानाय ०६ फरवरीत: ०८ मई २०१५ पर्यन्तं त्रैमासिकभारतीयफलितज्योतिषवास्तुशास्त्रपरिचयपाठ्यक्रमयो: सञ्चालनं कृतम्। पाठ्यक्रमयो: अध्यक्ष: ज्योतिषविभागाध्यक्ष: प्रो. भारतभूषणमिश्र: आसीत्। डॉ. अशोकथपलियालेन भारतीयफलितज्योतिषपरिचयपाठ्यक्रमस्य तथा च आ. हंसधरझामहाभागेन वास्तुशास्त्रपरिचयपाठ्यक्रमस्य समन्वयनं कृतम्। पाठ्यक्रमयो: ११८ प्रतिभागिन: भागं गृहीतवन्त:।



व्याख्यानं विदधान: डॉ. रामचन्द्रभट्ट:

### योगविषये विशिष्टं व्याख्यानम्

१३ फरवरी २०१५ दिनाङ्के भोपालपरिसरे योगविश्वविद्यालयस्य कुलपतिवर्यस्य आचार्यस्य रामचन्द्रभट्टमहोदयस्य "आधुनिकसमये योगस्यानुकूलता" इतिविषयोपरि विशिष्टं व्याख्यानमायोजितमभवत्। कार्यक्रमे तदानीन्तनपरिसरप्राचार्येण परमेश्वरनारायणशास्त्रिणा प्रो. भट्टस्य स्वागतं कृत्वा तस्य महानुभावस्य जीवनपरिचयं प्रादात्।

### राष्ट्रियशोधसम्मेलनम्

भोपालपरिसरस्य शिक्षाशास्त्रविभागेन २४ मार्चत: २६ मार्चपर्यन्तं "वैश्विकपरिप्रेक्ष्ये शान्तिशिक्षा मूल्यशिक्षा च" इति विषयोपरि त्रिदिवसीयराष्ट्रियशोधसम्मेलनमायोजितम्। अस्मिन्

सम्मेलने प्रो. रामानुजदेवनाथ-प्रो.जे.एस.राजपूतप्रभृतिविद्वांसः विशिष्टं व्याख्यानं दत्तवन्तः। शोधसम्मेलने नवत्यधिकविद्वांसः शोधपत्राणि प्रस्तुतवन्तः। सम्मेलनस्यास्य अध्यक्षः तत्कालिकपरिसरप्राचार्यः प्रो. परमेश्वरनारायणशास्त्रिमहाभागः समन्वयकः डॉ.नितिनजैनः सचिवश्च डॉ. नीलाभतिवारी आसीत्।



भाषमाणः आचार्यः रामानुजदेवनाथवर्यः

### प्रो. भारतभूषणमिश्रस्य विशेषपुरस्कारेण सम्मानम्

परिसरस्य ज्योतिषविभागस्य अध्यक्षः आचार्यः भारतभूषणमिश्रः लखनऊस्थया उत्तरप्रदेशसंस्कृताकादम्या संस्कृतस्य विशेषपुरस्कारं प्राप्तवान्। प्रो. मिश्राय तस्य सुप्रसिद्ध-पुस्तकस्य 'होरासारः' इत्यस्य कृतेऽयं पुरस्कारः प्रदत्तः। एतत्पूर्वमपि अनेन महानुभावेन २००५ ईस्वीयाब्दे तथा च २००७ ईस्वीयाब्दे साहित्यसम्मानं विविधपुरस्कारश्च सम्प्राप्तः।

### वार्षिकोत्सवः

२८ मार्च २०१५ दिनाङ्के भोपालपरिसरस्य वार्षिकोत्सवः परिसरस्य भवभूतिप्रेक्षागारे आयोजितः। कार्यक्रमेऽस्मिन् प्रो. विद्यानन्दझा महोदयेन वार्षिकप्रतिवेदनं प्रस्तुतम्। परिसरीयशोधपत्रिकायाः शास्त्रमीमांसायाः अपि अस्मिन् कार्यक्रमे लोकार्पणं जातम्। वार्षिकशैक्षिक-सांस्कृतिक-परीक्षा-क्रीडादिषु स्पर्धासु सफलप्रतिभागिच्छात्रेभ्यः पुरस्कारप्रमाणपत्रादिवितरणमपि कार्यक्रमेऽभवत्। कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण जम्मूपरिसरस्य प्राचार्यः रामानुजदेवनाथमहोदयः विशिष्टातिथिरूपेण च नगरनिगमस्याध्यक्षः श्रीसुरजीतसिंहचौहानः विराजितः आसीत्। कार्यक्रमस्यास्याध्यक्षत्वं तदानीन्तनपरिसरप्राचार्यः परमेश्वरनारायणशास्त्रिमहाभागः निरवहत्।

### शब्दाद्वैतविमर्शमधिकृत्य विशिष्टं व्याख्यानम्

३० मार्च २०१५ दिनाङ्के इलाहाबादस्थस्य गङ्गानाथपरिसरस्य प्रसिद्धवैयाकरणस्य प्रो. ललितकुमारपाण्डेयमहाभागस्य 'शब्दाद्वैतविमर्शः' इति विषयमधिकृत्य विशिष्टं व्याख्यानं भोपालपरिसरे समायोजितम्। अस्मिन्नवसरे पाणिनि-संस्कृत-वैदिक-विश्वविद्यालयस्य कुलपतिवर्यस्य आचार्यस्य रमेशचन्द्रपण्डा- महाभागस्योपस्थितिः परिसराय नितान्तगौरवास्पदमासीत्।

### कुलपतिमहाभागानां प्रो. परमेश्वरनारायणशास्त्रिवर्य्याणामभिनन्दनसमारोहः

०५ मई २०१५ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य नवनियुक्त-कुलपतिवर्यस्य माननीयस्य परमेश्वरनारायणशास्त्रिमहाभागस्य अभिनन्दनसमारोहः भोपालपरिसरे हर्षोल्लासपूर्वकं समायोजितो जातः। अस्मिन्नवसरे परिसरस्य सद्यः प्राचार्यपदं समलङ्कृतवतः विद्यानन्दझामहाभागस्यापि स्वागताभिनन्दनं परिसरपरिवारेण कृतम्। परिसराय अयम् अत्यन्तगौरवास्पदक्षणः आसीद्यत् परिसरस्यास्य प्राचार्यचरः एव संस्थानस्य कुलपतिपदं विभूषयतीति।



वार्षिकोत्सवे मञ्चासीनः अतिथिगणः

### शिक्षकप्रशिक्षणपाठलेखनराष्ट्रियकार्यशाला

१ जूनतः १० जून २०१५ पर्यन्तं भोपालपरिसरे राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्याय- पीठस्य तत्त्वावधाने आधुनिकविषयाणां पाठलेखनाय शिक्षकप्रशिक्षणपाठलेखनराष्ट्रियकार्यशाला समायोजिता जाता। अस्यां कार्यशालायां देहलीस्थस्य इन्दिरागान्धीमुक्त-विश्वविद्यालयस्य प्रो. सी.आर.के.मूर्तिमहाभागेन एवं च मुक्तस्वाध्यायपीठस्य निर्देशकवर्येण आचार्येण रमाकान्तपाण्डेयमहाभागेन व्याख्यानं प्रशिक्षणं च प्रदत्तम्। कार्यशालायाः समन्वयनं डॉ. धर्मेन्द्रकुमारसिंहदेवेन कृतम्।

### योगदिवसकार्यक्रमः

२१ जून २०१५ तमे दिनाङ्के 'अन्ताराष्ट्रिययोगदिवस' इत्यस्योपलक्ष्ये भोपालपरिसरे योगदिवसकार्यक्रमः समायोजितो जातः। कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण समागताः होशंगाबादस्थस्य आर्षगुरुकुलमहाविद्यालयस्य संरक्षकाः स्वामिनः ऋतस्पतिमहाभागाः पातञ्जलयोगसूत्रस्योपरि विशिष्टं व्याख्यानं दत्तवन्तः। कार्यक्रमे परिसरीयच्छात्रछात्राः प्राध्यापकाः कर्मचारिणश्च सामूहिकयोगाभ्यासे भागं गृहीतवन्तः। छात्राणां कृते आयोजितायां योगस्पर्धायां सञ्जयशाक्यः प्रथमं स्थानं, विशालशर्मा द्वितीयं स्थानं तथा च आयुषदीक्षित- दीपकदाशौ च संयुक्तरूपेण तृतीयं स्थानं लब्धवन्तौ।

### ज्योतिषप्रयोगशालायाः समुद्घाटनम्

६ जुलाई २०१५ दिनाङ्के परिसरस्य ज्योतिषविभागे स्थितज्योतिषप्रयोगशालायाः नवीकरणोपरान्तं परिसरप्राचार्येण विद्यानन्दझामहाभागेन समुद्घाटनं कृतम्। कार्यक्रमेऽस्मिन् पलभायन्त्र-राशिचक्र-गोलयन्त्र-दूरवीक्षणयन्त्रादिषु विषयेषु दृश्यश्रव्योपकरणमाध्यमेन परिचयः प्रदत्तः।



निरीक्षणदलं सम्बोधयन् प्राचार्यः प्रो. विद्यानन्दझा

**परिसरस्य निरीक्षणम्**

जुलाईमासस्य द्वितीयसप्ताहे मानवसंसाधनविकासमन्त्रालयस्य शिक्षासचिवः श्री पवनमेहतामहाभागः तथा च राष्ट्रियसंस्कृतसंस्थानस्य परियोजनाप्रभारी आचार्यः सर्वनारायण-झामहाभागः इत्यनयोः द्विसदस्यीयनिरीक्षणसमितिः भोपालपरिसरं समागच्छत्। उभावपि महानुभावौ परिसरस्य शिक्षण-प्रशिक्षणविभागानां छात्रादीनां च कृते भवनोपस्कराद्यावश्यकतानाम् आकलनाय शिक्षणकक्ष-ज्योतिषप्रयोगशाला-कार्यालय-च्छात्रावास-क्रीडाङ्गणादीनां निरीक्षणं कृतवन्तौ। परिसरपक्षतः निरीक्षणसमितेः समक्षं शिक्षाशास्त्रविभागाय नूतनभवनस्य, ज्योतिष-विभागस्य कृते तारादर्शककक्षस्य (प्लेनेटोरियम-विस्तृतप्रयोगशाला-अनुसंधानकक्ष-विभागीय-पुस्तकालयादयः) क्रीडाङ्गणस्य, पुस्तकालयस्य कृते भवनादीनाञ्च आसन्दिकादीनां च कृते प्रस्तावः समुपस्थापितः।

**प्रो. ओमप्रकाशभड़ानामहोदयस्य सौप्रस्थानिकसमारोहः**

जुलाईमासस्य तृतीयसप्ताहे परिसरस्य क्रीडाविभागस्य आधुनिकज्ञानविज्ञानविभागस्य च अध्यक्षवर्यस्य ओम्प्रकाशभड़ानामहोदयस्य भोपालतः जयपुरपरिसरे स्थानान्तरणस्य अवसरे तस्य सौप्रस्थानिकसमारोहः समायोजितः। कार्यक्रमे परिसरप्राचार्येण विद्यानन्दझामहाभागेन तस्याभिनन्दनं कृतम्।

**सत्रारम्भकार्यक्रमः**

१७ जुलाई २०१५, तमे दिनाङ्के भोपालपरिसरे औपचारिकरूपेण २०१५-२०१६ सत्रस्य आरम्भसमारोहः आचरितः। कार्यक्रमेऽस्मिन् पूर्वपुलिसमहानिदेशकः श्रीसुभाषचन्द्रत्रिपाठिमहाभागः मुख्यातिथिरूपेण छात्रान् उदबोधयत्। स्वसत्रारम्भीयोद्बोधने परिसरप्राचार्येण विद्यानन्दझामहाभागेन परिसरस्य मर्यादायाः सुसंस्कृतपरम्परायाश्च निर्वहणाय छात्राः प्रचोदिताः।

**स्वतन्त्रतादिवससमारोहः**

१५ अगस्त २०१५ दिनाङ्के भारतवर्षस्य सप्तषष्टितमः स्वतन्त्रतादिवसः भोपालपरिसरे परिसरीयच्छात्रैः प्राध्यापकैः कर्मचारिवर्गैश्च एकत्रीभूय परिसरप्राङ्गणे ध्वजारोहणपूर्वकं हर्षोल्लासेन समायोजितः। कार्यक्रमे परिसरप्राचार्येण विद्यानन्दझामहाभागेन स्वतन्त्रतादिवसस्य शुभकामनापूर्वकं स्वातन्त्र्यवीराणां कृते श्रद्धाञ्जलिं वितीर्य छात्राः देशहिताय समाजहिताय च कार्यकरणार्थमभिप्रेरिताः। कार्यक्रमस्य समन्वयनं डॉ. धर्मेन्द्रकुमारसिंहदेवेन कृतम्।



संस्कृतसप्ताहोत्सवे भाषमाणः प्राचार्यः

**संस्कृतसप्ताहसमारोहः**

भोपालपरिसरे २६ अगस्त तः ०१ सितम्बर २०१५ पर्यन्तं संस्कृतसप्ताहसमारोहः समायोजितः। सप्ताहसमारोहे शास्त्रार्थ-संस्कृतनाटक-गणेशपूजन-श्लोकपाठस्पर्धा-संस्कृतगीतस्पर्धा-संस्कृतभाषणस्पर्धा-संस्कृतकविसम्मेलनानां चायोजनमभवत्। उद्घाटनसमारोहे क्षेत्रीय-आव्रजनाधिकारिणः श्रीमनोजकुमाररायस्य, शिक्षाविदः आ. वेदनारायणचौधरीमहोदयस्य च गौरवमयी उपस्थितिः आसीत्। समापनसमारोहे मुख्यातिथिरूपेण पद्मश्री-आ. रमेशचन्द्रशाहः विशिष्टातिथिरूपेण तथा च भोपालस्य सांसदः आलोकसञ्जरः उपस्थितः आसीत्। परिसरप्राचार्येण विद्यानन्दझामहोदयेन समुपस्थितानामभ्यागतानां स्वागतं कृतम्। संस्कृतसप्ताहस्य प्रतिवेदनं ज्योतिषविभागाध्यक्षेण प्रो. भारतभूषणमिश्रेण प्रस्तुतम्। संस्कृतस्य प्रचारे प्रसारे चाग्रेसराः आचार्याः-क्षेत्रवासीपण्डा-सत्यजीतपाण्डेय-वेदनारायणचौधरी-प्रभादेवीचौधरी-हंसधरझा-ब्रजभूषणओझामहाभागाः समारोहेऽस्मिन् संस्कृतभूषणम् इति विरुदेन सम्मानिताः अभवन्।

**वार्षिकशास्त्रीय-सांस्कृतिकस्पर्धा एवं क्रीडास्पर्धा**

०४ सितम्बर २०१५ तः १० सितम्बर २०१५ पर्यन्तं परिसरस्य वार्षिकशास्त्रीय-सांस्कृतिक-क्रीडास्पर्धाः समायोजिताः। शास्त्रीयसांस्कृतिकस्पर्धान्तर्गतं प्रश्नमञ्च-भाषण-श्लोकगान-संस्कृतगीत-वादन-नृत्य-अभिनय-चित्रनिर्माण-रङ्गवल्लीत्यादयः स्पर्धाः समायोजिताः। एतासु स्पर्धासु सफलाः प्रतिभागिनः राज्यस्तरीयशास्त्रीयस्पर्धायै अखिल- भारतीययुवमहोत्सवाय च चिताः अभवन्।

**डॉ. राधाकृष्णन्स्मृतिव्याख्यानमाला**

०५ सितम्बर २०१५ दिनाङ्के डॉ. राधाकृष्णन्स्मृतिव्याख्यानमालान्तर्गतं काव्यसर्जन-प्रक्रिया-विषये राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचरस्य आ. राधावल्लभत्रिपाठिवर्यस्य विशिष्टं व्याख्यानं भोपालपरिसरे समायोजितम्। अस्मिन्नवसरे मुख्यातिथिरूपेण



व्याख्यानं विदधानः प्रो. राधावल्लभत्रिपाठिवर्यः

सांचीबौद्धभारतीयज्ञानाध्ययनविश्वविद्यालयस्य कुलपतिवर्या आ. शशिप्रभाकुमारमहाभागा अपि समुपस्थिता आसीत्। परिसरप्राचार्येण विद्यानन्दझामहोदयेन समुपस्थितानामभ्यागतानां स्वागतं व्याहृतम्।

### हिन्दीपखवाडासमारोहः

पञ्चदशदिवसपर्यन्तं समायोजितस्य हिन्दीपखवाडा इति पाक्षिकसमारोहस्य समापनं १५ सितम्बर २०१५ दिनाङ्के अभवत्। कार्यक्रमे मुख्यवक्तृरूपेण प्रसिद्धहिन्दीलेखकः समीक्षकश्च आ. विजयबहादुरसिंहः तथा च प्रसिद्धभाषाविद् आङ्ग्लभाषाचार्यः मूलारामजोशी समुपस्थितः। अस्मिन् पाक्षिकसमारोहे हिन्दीभाषाकेन्द्रिता विभिन्नस्पर्धाः समायोजिताः। समारोहस्यास्य समन्वयनं हिन्दीविभागाध्यक्षया डॉ. अर्चनादुबेमहाशयया कृतम्।

### स्वच्छतासप्ताहसमारोहः

सप्तदिवसपर्यन्तं समायोजितस्य स्वच्छतासप्ताहसमारोहस्य समापनं ०२ अक्टूबर २०१५ दिनाङ्के परिसरे अभवत्। परिसरप्राचार्येण विद्यानन्दझामहाभागेन स्वभाषणे कथितं यत् महात्मागान्धी-श्रीलालबहादुरशास्त्रिणोः जयन्तीदिवसः प्रतिवर्षं स्वच्छतादिवसरूपेण सर्वकारेण घोषितः वर्तते। परन्तु समाजस्य स्वस्य परिवारस्य च कार्यक्रमोऽयं प्रतिदिनं भवेदिति। समारोहस्यास्य समन्वयनं श्रीसुमितसक्सेनामहाभागेन कृतम्।

### राज्यस्तरीयशास्त्रीयस्पर्धा

७ अक्टूबरतः ८ अक्टूबर २०१५ पर्यन्तं भोपालपरिसरे मध्यप्रदेश-छत्तीसगढयोः राज्यस्तरीय-शास्त्रीय-स्पर्धा आयोजिता अभवत्। अस्यां स्पर्धायाम् उभाभ्यां राज्याभ्यां सप्तत्यधिकाः छात्राः ज्योतिष-साहित्य-व्याकरण-वेदान्त-पुराणेतिहास-मीमांसा-न्यायप्रभृतिषु विभिन्नशास्त्रेषु शलाकास्पर्धायां भाषणप्रतियोगितायाम् समस्यापूर्ति-अष्टाध्यायी-धातुरूप- काव्यकण्ठपाठादिस्पर्धासु च भागं ग्रहीतवन्तः। स्पर्धासु निर्णायकरूपेण परिसरीयप्राध्यापकैः सह आचार्याः इन्द्रमणिदास-बोधकुमारझा-रहसविहारीद्विवेदि-क्षेत्रवासीपण्डा-एच्.पी. दीक्षितलक्ष्मीनारायणपाण्डेय-रघुनाथप्रसादगोस्वामिप्रभृतयः बाह्यविद्वांसः समुपस्थिताः आसन्। परिसरप्राचार्यस्य विद्यानन्दझामहाभागस्य आध्यक्ष्ये कार्यक्रमोऽयं सम्पन्नोऽभवत्। अस्यां स्पर्धायां चिताः छात्राः दिसम्बरमासे तिरुपतौ समायोजितायाम् अखिलभारतीयशास्त्रीयस्पर्धायामपि राज्यस्य प्रतिनिधित्वं कृतवन्तः। स्पर्धानां समन्वयनम् आचार्येण हंसधरझामहोदयेन कृतम्।

### सतर्कताजागरणसप्ताहसमारोहः

२६ अक्टूबरतः ३१ अक्टूबर २०१५ पर्यन्तमायोजिते सतर्कताजागरणसप्ताहसमारोहे विशिष्टव्याख्यानेन सह निबन्ध-वादविवाद-भाषणादिविभिन्नस्पर्धाः समायोजिताः। अस्मिन्नेव क्रमे २८ अक्टूबर २०१५ तमे दिनाङ्के पुलिसमहानिदेशकमहोदयस्य श्रीपवनजैनमहोदयस्य सतर्कताजागणम् इति विषयमवलम्ब्य विशिष्टं व्याख्यानमभवत्। समारोहेऽस्मिन् परिसरप्राचार्येण विद्यानन्दझामहाभागेन परिसरीयच्छात्राः प्राध्यापकाः कर्मचारिणश्च सतर्कताहेतोः प्रतिबद्धतार्थं प्रतिज्ञापिताः। कार्यक्रमस्य समन्वयनम् आचार्येण सुबोधशर्मणा कृतम्।



सतर्कतादिनाचरणस्य दृश्यम्

### लौहपुरुषपटेलजयन्तीकार्यक्रमः

३१ अक्टूबर २०१५ दिनाङ्के 'एकतादिवस' इति नाम्ना लौहपुरुषसरदारवल्लभभाईपटेलमहोदयस्य जयन्ती कार्यक्रमः परिसरे आचरिता। आचार्येण भारतभूषणमिश्रमहोदयेन सरदारपटेलमहोदयस्य व्यक्तित्वं छात्राणां समक्षं समुपस्थापितम्। अस्मिन्नवसरे सरदारपटेलमहोदयस्य जीवनवृत्तम् आदर्शं च अवलम्ब्य वादविवाद-भाषण-निबन्धादिस्पर्धाः समायोजिताः। समारोहे पुस्तकप्रदर्शनी आकर्षणस्य केन्द्रम् आसीत्। कार्यक्रमस्यास्य संयोजनं डॉ. अशोककच्छवाहमहोदयेन कृतम्।

### युवमहोत्सवे सफलप्रतिभागिनां सम्माननम्

०९ नवम्बर २०१५ दिनाङ्के भोपालपरिसरे युवमहोत्सवे सफलप्रतिभागिनां सम्माननाय कार्यक्रमः समायोजितः। ध्यातव्यमस्ति यत् हिमाचलप्रदेशस्य बलाहरस्थाने स्थितस्य वेदव्यासपरिसरे ३० अक्टूबरतः २ नवम्बर २०१५ पर्यन्तं संस्थानस्य युवमहोत्सवः समायोजितः आसीत्, यत्र भोपालपरिसरेण ४ स्वर्णपदकानि, २ रजतपदकानि तथा च ९ कांस्यपदकानि अर्जितानि। प्राचार्यमहोदयेन प्रो. विद्यानन्दझामहोदयेन कार्यक्रमे पदकविजेतृणां छात्राणां सम्माननं कृत्वा अग्रेऽपि एतादृशी उपलब्धिः काङ्क्षिता।

### राष्ट्रियज्योतिषशोधसङ्गोष्ठी

२७ नवम्बरतः २८ नवम्बर २०१५ पर्यन्तं परिसरस्य ज्योतिषविभागेन 'वर्तमानपरिदृश्ये ज्योतिषस्य विभिन्नयोगाः – सम्भावनाः उपलब्धयश्चेति विषयोपरि द्विदिवसीया राष्ट्रियज्योतिषशोधसङ्गोष्ठी आयोजिता। सङ्गोष्ठ्याः समुद्घाटने मुख्यातिथेः मध्यप्रदेशशासनस्य आवासीयायुक्तमहोदयस्य श्री आर.के. चतुर्वेदी, (भा.प्रा.से.) इत्यस्य विशिष्टमुद्बोधनं अत्यन्तं प्रेरणासम्पदमासीत्। तदनन्तरं दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य अध्यक्षचरस्य आ. देवेन्द्रमिश्रवर्यस्य विशिष्टं व्याख्यानमभवत्। अथ व्याख्यानसत्रे आ. वासुदेवशर्मा–आ. ईश्वरभट्ट–डॉ. पी.वी.बी. सुब्रह्मण्यप्रभृतीनां विदुषां गम्भीरचिन्तनेन श्रोतारः मन्त्रमुग्धाः जाताः। सङ्गोष्ठ्याः विभिन्नेषु सत्रेषु ११५ शोधपत्राणि विद्वद्भिः शोधच्छात्रैश्च समुपस्थापितानि। समापनसमारोहे भोपालस्थस्य बरकत–उल्लाहविश्वविद्यालयस्य कुलपतिवर्यः आ. मुरलीधरतिवारिमहोदयः मुख्यातिथिरूपेण समुपस्थितः आसीत्। कार्यक्रमेऽस्मिन् देहलीस्थस्य श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य वास्तुशास्त्रविभागाध्यक्षस्य आ. देवीप्रसादत्रिपाठिमहोदयस्य वास्तुशास्त्रस्योपादेयताविषये विशिष्टं व्याख्यानं चित्ताकर्षकमासीत्। तदनन्तरं लखनऊतः समागतस्य प्रो. मदनमोहनपाठकस्यापि विशिष्टं व्याख्यानं जातम्। सङ्गोष्ठ्याम् आचार्याणां मुरलीमनोहरपाठक–क्षेत्रवासीपण्डा–प्रभुदयालमिश्र–विष्णुकुमारनिर्मल–विश्वरञ्जनपति–सुभाषमिश्रप्रभृतीनां विदुषां गरिममयी उपस्थितिः आसीत्। सङ्गोष्ठ्याः अध्यक्षः परिसरप्राचार्यः विद्यानन्दझाः समन्वयकः ज्योतिषविभागाध्यक्षः आ. भारतभूषणमिश्रः, उपाध्यक्षः आ. हंसधरझाः तथा च सचिवः डॉ. अशोकथपलियालः आसीत्।

### डॉ. ब्रजभूषणओझामहोदयानां शास्त्रकलानिधिसम्मानम्

२४ नवम्बर २०१५ दिनाङ्के व्याकरणशास्त्रे उल्लेखनीयमवदानमुपलक्ष्य डॉ. ब्रजभूषणओझाः महाराष्ट्रस्थस्य पुणेस्थितस्य श्रीबाबासहस्रबुद्धेसमाधिमन्दिरन्यासेन शास्त्रकलानिधिसम्माननेन अलङ्कृतो जातः। डॉ. ओझामहोदयस्य एतदुपलब्धौ परिसरप्राचार्येण विद्यानन्दझामहाभागेन परिसरपक्षतः तस्मै शुभाशयाः प्रदत्ताः।

### संविधानदिवससमारोहः

नवम्बरमासान्ते भोपालपरिसरे संविधानदिवसः, डॉ. भीमराव अम्बेडकरमहोदयस्य जयन्तीसमारोहः च समायोजितः। अस्मिन्नवसरे 'संविधाननिर्माणे भारतरत्नस्य डॉ. भीमराव–अम्बेडकरस्य योगदानम्' इति विषयमवलम्ब्य भाषणप्रतियोगिता आयोजिता। ३० नवम्बर २०१५ दिनाङ्के समारोहस्य समापनकार्यक्रमे आ. प्रभादेवीचौधरी महोदयायाः भारतीयसंविधानस्य विशेषताविषये विशिष्टं व्याख्यानमपि अभवत्। प्राचार्यस्य अध्यक्षतायां सम्पन्ने अस्मिन् कार्यक्रमे सभाम् आ. अर्चना चौहान् प्रवर्तितवती।

---

## श्रीरणवीरपरिसरस्य वार्ताः




अन्ताराष्ट्रियुवदिवसाचरणे मञ्चासीनः अतिथिगणः

**राष्ट्रिययुवदिवसस्य आयोजनम्** – २०१५ वर्षस्य जनवरीमासस्य द्वादशे दिनाङ्के स्वामिविवेकानन्दस्य जयन्त्यवसरे राष्ट्रिययुवदिवसस्य आयोजनम् अभवत्। कार्यक्रमस्य शुभारम्भः परिसरप्राचार्येण विभागाध्यक्षैश्च दीपप्रज्वालनेन कृतः। कार्यक्रमेऽस्मिन् शिक्षाशास्त्रविभागस्य छात्राः नव्यवेदान्तदर्शनप्रवर्तकस्य राष्ट्रियसतः स्वामिविवेकानन्दस्य व्यक्तित्वकृतित्वयोगदानविषये विस्तरेण सञ्चर्च्य स्वामिनः उदात्तविचाराणाम् आत्मसात्करणस्य सङ्कल्पमकुर्वन्। विभागस्य सर्वे आचार्याः अवसरेऽस्मिन् उपस्थिताः आसन्।

जनवरीसप्तविंशतिदिनाङ्के परिसरे राज्यस्तरीयस्पर्धायाः आयोजनम् आचार्यस्य मनोजकुमारमिश्रमहोदयस्य संयोजने अभूत्। अस्यां स्पर्धायां जम्मूप्रान्तस्य विद्यालयानां महाविद्यालायानां च छात्राः भागं गृहीतवन्तः। विजेतृभ्यः छात्रेभ्यः पुरस्काराश्च प्राचार्येण प्रदत्ताः।

**वृक्षपरिचर्चा** – परिसरप्राचार्यस्य रामानुजदेवनाथमहोदयस्य निर्देशानुसारं जनवरीमासस्य त्रिंशत्तमे दिनाङ्के भारतीयवन्यसेवायाः अधिकारिणः श्री ओम्प्रकाशविद्यार्थिमहोदयस्य मार्गदर्शने परिसरे वृक्षपरिचर्चाकार्यक्रमः आयोजितः। कार्यक्रमेऽस्मिन् श्री ओम्प्रकाशशर्ममहोदयः अस्मद्वातावरणे विद्यमानानां वनस्पतिजातानां गुणदोषाणां विश्लेषणमकरोत्। ऐषमः कार्यक्रमः ३२१ तमः आसीत्। अस्यां वृक्षपरिचर्चायां शिक्षाशास्त्रिकक्षायाः छात्राः अहमहमिकया भागमगृह्णन्।

**वार्षिकप्रायोगिकपरीक्षा** – राष्ट्रियसंस्कृतसंस्थानस्य के.जे. सौमय्याविद्यापीठस्य प्राचार्यचरस्य प्रो. एम्.ए. बाबूमहोदयस्य मुख्यपरीक्षकत्वे ०१.०२.२०१५ तः १५.०२.२०१५ पर्यन्तं शिक्षाशास्त्रिच्छात्राणां वार्षिकप्रायोगिकपरीक्षा सम्पन्ना।

**क्रीडासप्ताहसमारोहः** – १९ फरवरीत् २४ फरवरीपर्यन्तं परिसरे क्रीडासप्ताहसमारोहः सम्पन्नः यत्र छात्राः अहमहमिकया भागमगृह्णन्। विजेतृभ्यः छात्रेभ्यः पुरस्कारम् अन्ताराष्ट्रियधनुर्धरः स्वर्णपदकेन विभूषितः श्रीरजतचौहानः दत्तवान्।

**श्रीशङ्करशास्त्रार्थपरिषद्** – फरवरीमासे २५ तमे दिनाङ्के श्रीशङ्करशास्त्रार्थपरिषदः तृतीयाधिवेशने ज्यौतिषविभागस्य डॉ. प्रभातकुमारमहापात्रेण 'मानवजीवने वक्रीयग्रहाणां प्रभावः' इति विषयमवलम्ब्य व्याख्यानं प्रदत्तम्। अन्येऽपि ज्योतिषविभागीयाः अध्यापकाः डॉ. निगमपाण्डेय-चन्द्रमौलिरेणा-प्रभृतयोऽपि व्याख्यानं दत्तवन्तः।

**प्राथमिकचिकित्साप्रशिक्षणवर्गः** परिसरस्य शिक्षाशास्त्रिच्छात्राणां कृते प्राथमिकचिकित्सावर्गस्य आयोजनं प्रसिद्धया रेडक्रासंस्थया २५.०२.२०१५ तः ०४.०३.२०१५ पर्यन्तं कृतम्। अस्मिन् कार्यक्रमे शिक्षाविभागस्य अध्यापकाः सहयोगमकुर्वन्।



सम्मानयन् आचार्यः रामानुजदेवनाथवर्यः

**बालचरप्रशिक्षणवर्गः** – शिक्षाशास्त्रिच्छात्राणां कृते बालचरप्रशिक्षणकार्यस्य आयोजनं ०५.०३.२०१५ तः १२.०३.२०१५ पर्यन्तं परिसरे एवाभवत्। कार्यक्रमस्य समारोहे जम्मूकश्मीरराज्यस्य समाजकल्याणमन्त्री श्रीबालीभगतमहोदयः मुख्यातिथिरूपेण उपस्थितः अभवत्। क्रीडाविभागस्य निर्देशकः श्रीनवीन-अग्रवालमहोदयः विशिष्टातिथिरूपेण तथा परिसरप्राचार्यः रामानुजदेवनाथमहोदयः कार्यक्रमाध्यक्षरूपेण उपस्थितः आसीत्। अस्य समारोपसमारोहस्य सञ्चालनं बालचरविभागस्य प्रशिक्षकेण श्रीराजेन्द्रकोतवालमहोदयेन कृतम्। अस्मिन् कार्यक्रमे जम्मूकश्मीरस्काउटगाइडविभागस्य अधिकारिणः शिक्षाशास्त्र- विभागस्य सर्वे आचार्याश्च उपस्थिताः आसन्।

**शैक्षिकभ्रमणम्** – सत्रेऽस्मिन् शिक्षाशास्त्रिच्छात्राणां शैक्षिकयात्रा १७.०२.२०१५ तमे दिनाङ्के सम्पन्ना शिक्षाशास्त्रिच्छात्राः विभागीयाध्यापकाश्च हिमाचलप्रदेशस्य काठगढस्थस्वयम्भू-अर्धनारीश्वरमहादेवस्य दर्शनार्थं सम्भूय गताः। एतत् भ्रमणं विभागाध्यक्षस्य नेतृत्वे सुसम्पन्नम्।




सम्मानयन् कुलपतिः प्राचार्यश्च

**राष्ट्रियसेवायोजना** – मार्चमासस्य अष्टाविंशतितमे दिनाङ्के परिसरे राष्ट्रियसेवायोजनायाः अङ्गत्वेन डॉ. राजेन्द्रलालस्य संयोजकत्वे शिक्षाशास्त्रिच्छात्राः परिसरे स्वच्छताभियानं चालितवन्तः। अस्मिन् कार्यक्रमे विभागस्य सर्वे अध्यापकाः मार्गदर्शनमकुर्वन्।

फरवरीमासे सप्तविंशतिदिनाङ्के प्रवृत्ते श्रीशङ्करशास्त्रार्थपरिषदः समापनसमारोहे श्री रामप्रतापवेदालङ्कारमहोदयस्य आध्यक्ष्ये साहित्यविभागाध्याक्षेण डॉ. सतीशकुमारकपूरमहोदयेन "काव्यमार्गे स्वरो न गण्यते" इति विषयमवलम्ब्य स्वविचारः प्रकटितः। एवमेव डॉ. राजकुमारमिश्रेण वृत्तिविमर्शः इति विषयः प्रस्तुतः। डॉ. तेजनाथपौडेलमहाभागेनापि अत्र स्वाशयः प्रकटितः।

**वार्षिकदिनोत्सवः** अप्रैलमासस्य दशमदिनाङ्के वार्षिकदिनोत्सवः समाचरितः। प्रधानमन्त्रिणः विज्ञानप्रविध्योः विशेषकार्याधिकारिचरस्य ओम्प्रकाशपाण्डेयमहोदयस्य मुख्यातिथित्वे, परिसरीयप्राचार्यस्य आध्यक्ष्ये चायं कार्यक्रमो जातः।




संस्कृतोत्सवस्य एकं दृश्यम्

जुलाईमासस्य द्वाविंशतिदिनाङ्के सत्रारम्भो अभूत् गणेशपूजनेन साकम्।

जुलाईमासस्य सप्तविंशतिदिनाङ्के षाण्मासिकशोधप्रविधिकक्षायाः संचालनं जातं परिसरप्राचार्येण अस्याः शुभारम्भो विहितः।

जुलाईमासस्य अष्टाविंशतिदिनाङ्के मुक्तस्वाध्यायद्वारेण आयोजितायाः ज्योतिष-कार्यशालायाः शुभारम्भोऽभूत् पुनः सप्तदशदिनाङ्के अस्याः समापनमभूत्।

अनौपचारिकसंस्कृतशिक्षणस्य उद्घाटनम् अगस्तमासस्य तृतीये दिनाङ्के अभूत्। पुनः समापनं चतुर्दशदिनाङ्के जातं यत्र मुख्यातिथिरूपेण राज्यमंत्री प्रियासेठी समुपस्थित आसीत्।

अन्ताराष्ट्रीययुवदिवसस्य आयोजनम् अगस्तमासस्य द्वादशदिनाङ्के अभूत्।

**संस्कृतसप्ताहमहोत्सवः** – संस्कृतसप्ताहोत्सवस्य समारम्भः अगस्तमासस्य चतुर्विंशतिदिनाङ्के अभूत् अयं कार्यक्रमः जम्मूविधानसभाध्यक्षस्य श्रीकवींद्रगुप्तामहोदयस्य मुख्यतिथित्वे जातः। विशिष्टातिथिरूपेण श्री विजयसिंहसम्प्याला: निर्देशकरेडियोकश्मीर जम्मू उपस्थिताः आसन्।

**कृष्णाय वासुदेवाय हरये परमात्मने।**
**प्रणतक्लेशनाशाय गोविन्दाय नमो नमः।।**

इति मन्त्रद्वारा अखण्डपरायणमभूत् पुनः पञ्चविंशतिदिनाङ्के अखनूरप्रान्ते संस्कृतशोभा- यात्रायाः आयोजनमभूत्।

सितम्बरमासस्य चतुर्थे दिनाङ्के शिक्षकदिवससमारोहोऽभूत्।

**हिन्दीपखवाड़ा** – सितम्बरमासस्य चतुर्दशदिनाङ्के हिन्दीपखवाड़ा इति समारोहस्यायोजनं जातम्। अस्मिन् कार्यक्रमे श्रीरामचरितमानसस्य अखण्डपारायणमभूत् तदनन्तरं विविधकार्यक्रमाणामायोजनमपि जातम्।

अक्टूबरमासस्य पञ्चमदिनाङ्के शिक्षाविभागेन "मूल्यशिक्षायां गुणवत्तासंवर्धनाय संस्कृतस्य योगदानम्" इति विषयमाधारीकृत्य एकदिवसीयायाः राष्ट्रीयसंगोष्ठ्या आयोजनं कृतम्।

**आयोजिता डॉ. वी. राघवन्स्मृतिव्याख्यानमाला** – श्रीरणवीरपरिसरेण अक्टूबरमासस्य सप्तमदिनाङ्के डॉ. वी. राघवन्व्याख्यानमालायाः अङ्गतया (सोम आह्युस्का इत्यनयोस्तुलनात्मकमध्यनम्) इति विषयमवलम्ब्य प्रो. वी. उपेन्द्रराव (विभागाध्यक्षः, संस्कृतविभागः, जे.एन.यू.) – महोदयस्य व्यख्यानम् आयोजितमासीत्। अस्मिन्नेव दिने श्रीशङ्करशास्त्रार्थपरिषदः द्वितीयसत्रस्य शुभारम्भोऽपि विहितः।

अक्टूबरमासस्य अष्टमे दिनाङ्के ज्योतिषविभागेन एकदिवसीया राष्ट्रीयसंगोष्ठी आयोजिता।

**द्विदिवसीया राष्ट्रियवेदसंगोष्ठी** – "समसामायिकसन्दर्भे वेदोदितनैतिकावधारणा" इति विषयमवलम्ब्य नवम्बरमासे एकोनविंशतित आरभ्य विंशतिदिनाङ्कपर्यन्तं द्विदिवसीयायाः राष्ट्रियसंगोष्ठ्याः आयोजनं वेदविभागेन कृतम्, अस्याः उद्घाटनं कुलपतिः प्रो. पी.एन्. शास्त्रिणः आध्यक्षत्वे एवमेव जम्मूराज्यस्य उपमुख्यमन्त्रिणः डॉ. निर्मलसिंहमहोदयस्य मुख्यातिथित्वे, प्रो. दयानन्दभार्गवस्य विशिष्टातिथित्वे युगलकिशोरमिश्रमहोदयस्य सारस्वतातिथित्वे मुख्यसंयोजकस्य वेदविभागाध्यक्षस्य प्रो. मनोजकुमारमिश्रमहाभागस्य च सान्निध्ये अभूत्।



राष्ट्रियसङ्गोष्ठ्यां पुस्तकं विमोचयन् अतिथिगणः

नवम्बरमासस्य षड्विंशतिदिनाङ्कतः आरभ्य नवम्बरमासस्य त्रिशत्दिनाङ्कं यावत् संविधानदिवससमारोहस्यायोजनमभूत्।

नवम्बरमासस्य त्रयोविंशतिदिनाङ्कतः आरभ्य २ दिसम्बरं यावत् प्राकृतशिक्षण-शिबिरस्यायोजनं जैनविश्वभारतीविश्वविद्यालयेनायोजितम्। अस्य शिबिरस्य शिक्षणम् प्रो. दामोदरशास्त्रिमहाभागेन कृतमिति।

नवम्बरमासस्य सप्तविंशतिदिनाङ्के प्राचामर्वाचां लक्ष्यलक्षणग्रन्थानां विवेकः इति विषयमवलम्ब्य साहित्यविभागेन एकदिवसीयराष्ट्रियसंगोष्ठ्याः आयोजनं कृतम्।

नवम्बरमासस्य द्वितीयदिनाङ्कत आरभ्य षष्ठदिनाङ्कपर्यन्तं सरदारवल्लभभाईपटेलजयन्त्याः अयोजनं परिसरे अभूत्। अत्र मुख्यवक्तृत्वेन संस्कृतभारत्याः संगठनमन्त्री श्री दिनेशकामत्महोदयः समुपस्थित आसीत्।

दिसम्बरमासस्य एकविंशतिदिनाङ्के गीतासमारोहस्य आयोजनं गांधीनगरे केन्द्रीयविद्यालयसंगठनसभागारे अभूत्। समारोहेऽस्मिन् बहवः विद्यालयच्छात्राः सोत्साहं भागमगृह्णन्।

## श्रीसदाशिवपरिसरस्य वार्ता

२६.२.२०१५ दिनाङ्के सदाशिवपरिसरे सर्वदर्शनविभागेन विशिष्टव्याख्यान-कार्यक्रमः आयोजितः। कार्यक्रमेऽस्मिन् काशीहिन्दूविश्वविद्यालयस्य वैदिकदर्शन-विभागस्य आचार्यः कृष्णकान्तशर्मा 'प्रकृतिपुरुषयोर्विवेकज्ञानमिति विषयमधिकृत्य विशिष्टं व्याख्यानम् अकरोत्।

**राष्ट्रियसंगोष्ठी** – २७.२.२०१५ तः २८.२.२०१५ यावत् 'भारतीयदर्शनानां 'सांप्रतिकसन्दर्भे प्रासङ्गिकता' इति विषये द्विदिवसीया राष्ट्रियसंगोष्ठी समनुष्ठिता, सन्दर्भेऽस्मिन् श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य श्रीजगन्नाथसंस्कृतिप्रकल्पस्य शोधनिदेशकः आचार्यहरमोहनमिश्रमहोदयः मुख्यातिथिरूपेण संगोष्ठीमलमकरोत्।

विभागीयच्छात्राणाम् अध्यापकानाञ्च विविधशोधलेखान् धारयन्ती – 'दर्शनप्रभा' नाम्नी शोधपत्रिका प्रकाशिता वर्तते।




राष्ट्रियसङ्गोष्ठ्याः उद्घाटनसत्रस्य दृश्यम्



व्याख्यानमालाकार्यक्रमस्य एकं दृश्यम्



अद्वैतवेदान्तराष्ट्रियसङ्गोष्ठ्याः किञ्चन चित्रम्

नव्यन्यायविभागेन मार्च्चमासे आयोजितायां विशिष्टव्याख्यानमालायां काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्याधर्मविज्ञानसङ्कायस्य विभागाध्यक्षः आचार्यः राजारामशुक्ल हेत्वाभासविषयमधिकृत्य विशिष्टव्याख्यानमकरोत्। वार्षिकोत्सवे च विभागीयवार्षिकपत्रिकायाः तर्कतरङ्गिण्याः विमोचनं जातम्।

धर्मशास्त्रविभागपक्षतः आइ.एस.एस.एन. संख्यायुक्ता देवयानमिति विभागीयपत्रिका प्रकाशिता। विभागपक्षतः आयोजितविशिष्टव्याख्यानमालायां आचार्याः वाचस्पतित्रिपाठिमहाभागाः छात्रान् बोधितवन्तः।

छात्राणाम् २१ दिनात्मकः भाषाविकासात्मकः अभिविन्यासकार्यक्रमः – अगष्ट ३तः २२ पर्यन्तम् अभवत्। शिक्षकदिवसः – ०५.०९.२०१५ दिनाङ्के परिपालितः। विशिष्टव्याख्यान- माला – १४.०९.२०१५ दिनाङ्के संपादिता। हिन्दी पखवाडा – १४.०९.२०१५ – ३०.०९.२०१५ दिनाङ्कं यावत् अयोजितम्। राष्ट्रियशिक्षादिवसः – १०.११.२०१५ दिनाङ्के संपादितः। संविधानप्रणयनदिवसः आम्बेदकरजयन्ती च – २६.११.२०१५ तः ३०.११.२०१५ पर्यन्तम् आयोजितम्। प्रो. विजयपालकच्छवाहमोदयस्य आचार्यरूपेण प्रोन्नतिपुरस्सरं जम्मूतः पुरीं प्रति स्थानान्तरणम् – १३.१०.२०१५ दिनाङ्के जातम्। प्रो. सोहनलालपाण्डेयवर्यस्य जयपुरपरिसरतः पुरीं प्रति स्थानान्तरणम् – २६.०९.२०२५ दिनाङ्के जातम्। NCTE पक्षतः गौहाटीनगरे समायोजितायां संगोष्ठ्यां (१ तः ३०.२०१५ पर्यन्तम्) डॉ. पद्ममित्रश्रीनिवासः भागमवहत्।

प्रचलिते २०१५ तमे वर्षे फरवरी मासे पुराणेतिहासविभागपक्षतः 'रामायणे शास्त्रगततत्त्वानि' इति शीर्षकमवलम्ब्य द्विदिवसीया राष्ट्रिया चर्च्चासंगोष्ठी प्रवर्तिता। अस्मिन् मासे 'पुराणेषु ब्रह्मतत्त्वविमर्शः' इति शीर्षकोपेता विशिष्टव्याख्यानमाला च समनुष्ठिता। फेब्रवरीमासे व्यासपीठसमितिपक्षतः छात्रेषु विद्वत्सु च 'भागवतामृतमिति' शोधपत्रिकायाः वितरणमभूत्। जुलैमासे ३० तमे दिनाङ्के व्यासजयन्ती – समारोहः समनुष्ठितः। विभागपक्षतः सेप्टेम्बरमासे भागवतजयन्ती महासमारोहेण सह परिपालिता। कार्त्तिकमासस्य देवोत्थापन्यैकादश्यां (१९.११.२०१५ दिनाङ्के) श्रीमद्भागवतमहापुराणस्य पारायणं पूजनञ्चापि अनुष्ठितम्। समारोहेऽस्मिन् विशिष्टाः भागवतविद्वांसः स्वामिव्रजेन्द्रनन्दनदाशमहाभागाः भागवतस्य प्रभावोत्पादकं व्याख्यानं दत्तवन्तः। राष्ट्रियसंस्कृतसंस्थानप्रायोजितं 'महाभारते शास्त्रगततत्त्वानि' इति शीर्षकोपेतं द्विदिवसीयं चर्च्चासत्रं दिसम्बरमासे समनुष्ठितम्। विभागपक्षतः छात्रेषु शोधार्थिषु विद्वत्सु च पुराणज्योत्स्नापत्रिकायाः 'श्रीजगन्नाथनवकलेवरविशेषाङ्कस्य' च वितरणमभवत्। डिसेम्वरमासस्य २३ दिनाङ्के गीताजयन्तीसमारोहश्च समनुष्ठितः।

इतिहासविभागपक्षतः विशिष्टव्याख्यानम् अयोजितम्। श्रीजगन्नाथस्य नकलेवरोपरि अपि विभागे राज्यस्तरीयालोचना संजाता। यत्र उत्कलस्य विधि-पञ्चायत-विभागस्य मन्त्री माननीयः अरुणसाहुः मुख्यातिथिरूपेण उपस्थितः आसीत्। विभागपक्षतः 'हिन्दीपखवाडा' अध्यापिकायाः डॉ. केतकीमहापात्रमहोदयायाः सहयोगेन आयोजिता। नीलाचलसौरभमिति एका पत्रिका अपि अस्मिन् प्रसङ्गे आत्मप्रकाशं कृतवती, यस्याः संपादिका हिन्दीविभागाध्यापिका डॉ. केतकीनायकमहोदया अस्ति। निर्माल्यम् इति संस्थासहयोगेन विभागपक्षतः एकं जातीयचर्च्चासत्रम् आयोजितम्, यत्र 'भारतं सहनशीलतायाः प्रतीकम्' इति विषयः चर्च्चनीय आसीत्।

**सप्तमः अन्तःपरिसरीययुवमहोत्सवः**

२०-२३ (२०१४) दिसम्बरमासे राष्ट्रियसंस्कृतसंस्थानद्वारा श्रृंगेरीपरिसरे समायोजिते कार्यक्रमेऽस्मिन् परिसरपक्षतः छात्राः सप्तदशपदकानि जितवन्तः। तेषु नवस्वर्णपदकानि, पञ्चरजतपदकानि त्रीणि कांस्यपदकानि वर्तन्ते।

**ग्लोरिफेष्टमहोत्सवः**

१२.०१.२०१५ तः १६.०१.२०१५ यावत् अस्मिन् महोत्सवे परिसरपक्षतः पञ्चदशछात्राः भागं गृहीतवन्तः प्रथमं पुरस्कारं शोधच्छात्रः सुब्रतषडङ्गी प्राप्तवान्, अयमेव हास्यभूमिकायां द्वितीयं पुरस्कारमपि प्राप्तवान्। कार्यक्रमेऽस्मिन् डॉ. नन्दिघोषमहापात्र अथ च श्रीविश्वनाथमिश्रः मार्गनिर्देशकः आसीत्।

## गुरुवायूर्-परिसरोदन्तः



संस्कृतसप्ताहोत्सवस्य उद्घाटनस्य दृश्यम्

### साप्ताहिकसंस्कृतमहोत्सवः

०७.०८.२०१४ तः १३.०८.२०१४ पर्यन्तं सञ्चालितस्य संस्कृतसप्ताहमहोत्सवस्य उद्घाटनं ०७.०८.२०१४ दिनाङ्के डॉ. एम.वी. नत्सन-(सहाचार्यः, श्री शङ्कराचार्यसंस्कृतविश्वविद्यालयः कालडी) महाभागस्य करकमलाभ्यां जातम्, परिसरप्राचार्य्यस्याध्यक्ष्ये संचालितेऽस्मिन् कार्यक्रमे "संस्कृते उद्योगावसरः" इति अधिग्रहीते विषये डॉ. एम.वी.नत्सनमहोदयः स्वाभिप्रायं प्राकटयत्। डॉ. के.के.साइन-(शिक्षाशास्त्रविभागाध्यक्षः) महोदयः स्वागतभाषणम् अकरोत्। अथ च डॉ. सुशान्तकुमारराय: (संविदाशिक्षकः) धन्यवादमार्पयत। एतस्य संस्कृतसप्ताहमहोत्सवस्य संयोजकः डॉ. के.गिरिधरराव् आसीत्।

### विस्तरव्याख्यानम्

अस्मिन् पर्याये प्रो. अशोक अकलुजकरमहोदयः (सम्मानिताचार्यः) अथ च प्रो. विश्वनाथगोपालकृष्णमहोदयः (प्राचार्यः श्रीगौतमीविद्यापीठम् प्राच्यविद्याकलाशाला राजेन्द्रपुरम्) विविधेषु विषयेषु स्वव्याख्यानं प्रस्तुतवन्तः।

### एकविंशतिदिवसात्मिका कार्यशाला

११.०२.२०१५ तः ०३.०३.२०१५ यावत् परिसरेण एकविंशतिदिनव्यापिनी शोधप्रविधि- हस्तलिपि-पाठानुसंधानं कार्यशाला आयोजिता, कार्य्यशालायां त्रयस्त्रिंशत् छात्राः समवेताः आसन्। परिसरप्राचार्यस्य प्रो. सी.एच.एल. शर्म्मणः आध्यक्ष्ये, अथ च डॉ. सुब्रह्मण्यशर्म्मणः (सहाचार्यः वेदान्तविभागः) संयोजकत्वे, शिबिरस्यास्य डॉ. टी.पी.रवीन्द्रन्महोदयः (कुलसचिवः, शङ्कराचार्यसंस्कृतविश्वविद्यालयः) करकमलाभ्याम् उद्घाटनम् अकरोत्। निर्दिष्टविषये समागत-विद्वांसः स्वाशयं प्रकटितवन्तः। तथा चान्ते सम्पूर्तिसमारोहः ०३.०३.२०१५ दिनाङ्के श्री आर्.गोपालकृष्णमहोदस्य (सचिवः केरलसाहित्य-अकादमी) मुख्यातिथित्वे अभवत्।

### स्वच्छभारताभियानम्

वर्षेऽस्मिन् भारतसर्वकारेण महात्मागान्धि-जन्मदिवसमुपलक्ष्य स्वच्छभारताभियानं समुद्घोषितम्। तमेवानुसृत्य परिसरीयाः प्राध्यापकाः कर्मचारिणश्च २५.०९.२०१४ तः २१.१०.२०१५ दिनाङ्कं यावत् प्रतिभागं साहाय्यञ्च दत्तवन्तः।

### राष्ट्रियैकतादिवसः

३१.१०.२०१४ दिनाङ्के सरदारबल्लभभाईपटेलवर्य्यस्य जन्मदिवसमुपलक्ष्य परिसरेण राष्ट्रिय-एकतादिवसः कार्यक्रमः समनुष्ठितः। दिवसेऽस्मिन् वादविवादादि-नैककार्यक्रमाः अभूवन्, परिसरीयाः छात्राध्यापक-कर्मचारिणः सोत्साहं भागम् अजरीगृह्यन्त।



वार्षिकोत्सवोद्घाटनस्य चित्रम्



शोधप्रविधिकार्यशालायाः दृश्यम्



प्रो. सत्यव्रतशास्त्रिणां स्वागतं कुर्वन् परिसराध्यापकगणः

## प्रयागस्थगङ्गानाथझापरिसरवार्त्ता

### १. विस्तरव्याख्यानम्

गतवर्षमिव अस्मिन्नपि वर्षे परिसरेण विस्तरव्याख्यानं समायोजितम्।

### २. हिन्दीपखवाडाकार्यक्रमः

परिसरेण हिन्दीपखवाडाकार्यक्रमः समनुष्ठितः, कार्यक्रमे विविधाः प्रतियोगिताः सञ्चालिताः, तासु सर्वासु प्रयागस्थविद्यालयानां छात्राः सोत्साहं भागं गृहीतवन्तः, परिसरेण जितवद्भ्यः पुरस्कारः प्रदत्तः।

### ३. अध्यापकदिवसोत्सवः

परिसरेण सितम्बरमासे अध्यापकदिवसोत्सवः समायोजितः, कार्यक्रमे परिसरस्थाः सर्वे समवेताः आसन्।



व्याख्यानमालायाः एकं दृश्यम्

## क.जे.सोमय्याः विद्यापीठं मुम्बईपरिसरोदन्तः

### एकदिवसीयराष्ट्रियसंगोष्ठी

२६.०२.२०१५ दिनाङ्के शिक्षाशास्त्रविभागपक्षतः एकदिवसीयराष्ट्रियसंगोष्ठी समायोजिता। कार्यक्रमे मुख्यातिथिरूपेण डॉ. वसुन्धरा पद्नाभन् (प्राचार्या, सोमैयासंस्कृतमहाविद्यालयः) अथ च प्रो. वाई.एस्. रमेशमहाशयानामुपस्थितिः आसीत्। त्रिचत्वारिंशत् प्राध्यापकाः अथ च बहुसंख्याकाः शोधच्छात्राः स्व-स्वशोधपत्रं प्रस्तुतवन्तः।

कार्यक्रमस्यास्य संयोजकः प्रो. मदनमोहनझा एवं सहसंयोजकः डॉ. देवदत्तसरोडेमहोदयः आसीत्।

### साहित्ये शतावधानकार्यक्रमः

२२.०१.२०१५ दिनाङ्के "कालिदासकाव्येषु अवधानम्" इतिविषयम् अधिकृत्य डॉ. पी.टी.जी. वाई. रंगाचार्यमहोदयः अवधानकार्यक्रमं प्रस्तुतवान्।

### विशिष्टव्याख्यानमाला

प्रतिवर्षमिव ऐषमः वर्षेऽपि परिसरद्वारा व्याख्यानमाला समायोजिता, तथा च साहित्य- शास्त्रस्य व्याख्यानमाला १६.०१.२०१५ दिनाङ्के, अथ च शिक्षाशास्त्रस्य २७.०२.२०१५ दिनाङ्के व्याकरणस्य १०.०३.२०१५ दिनाङ्के एवञ्च ज्योतिषे ११.०३.२०१५ दिनाङ्के समायोजिता।

### शोधप्रविधि-पाण्डुलिपि-विज्ञानस्य कार्यशाला

परिसरद्वारा २२.०७.२०१४ तः ११.०८.२०१४ यावत् शोधप्रविधिपाण्डुलिपिविज्ञानविषयिणी कार्यशाला समायोजिता। परिसरीयाः प्राध्यापकाः छात्राश्च भागं गृहीतवन्तः।

### विश्वयोगदिवसः

परिसरे अस्मिन् वर्षे विश्वयोगदिवसकार्यक्रमः २१.०६.२०१५ दिनाङ्के समनुष्ठितः। विश्वयोगदिवसमुपलक्ष्य प्रातः १० वादने परिसरीयच्छात्रेभ्यः योगासनप्रतियोगिता समायोजिता। कार्यक्रमाध्यक्षः परिसरप्राचार्यः प्रो. एम्.चन्द्रशेखरः विश्वयोगदिवसमुपलक्ष्य सर्वान् उद्बोधितवान्।

## जयपुरपरिसरवृत्तान्तः


निरीक्षणं कुर्वाणः आचार्यगणः

### हिन्दीदिवससमारोहः

१४.०९.२०१५ दिनाङ्के हिन्दीदिवससमारोहः समायोजितः। कार्यक्रमस्य संयोजकाः प्रो. वाई. एस्. रमेशमहोदयाः आसन्। परिसरप्राचार्येण आध्यक्ष्यं निर्व्यूढम्। पञ्चदिवसात्मके समारोहेऽस्मिन् हिन्दीप्राध्यापकाभ्यां डॉ. रेखापाण्डेया-सुभाषमहोदयाभ्यां च कवितापाठनिबन्धादि-अनेकप्रतियोगिताः समायोजिताः।

### त्रैमासिकज्योतिषपरिचयपाठ्यक्रमः

२०.१२.२०१५ तः २२.१२.२०१५ दिनाङ्कपर्यन्तं त्रैमासिकज्योतिषपरिचयपाठ्यक्रमस्य वास्तुपरिचयपाठ्यक्रमस्य च सञ्चालनमभवत्। वास्तुपरिचयपाठ्यक्रमस्य संयोजनं प्रो. ईश्वरभट्टमहोदयेन तथा च ज्योतिषपरिचयपाठ्यक्रमस्य संयोजनं प्रो. वासुदेवशर्ममहोदयेन कृतमिति।

### ज्योतिषसंगोष्ठी

नवम्बरमासे ज्योतिषविभागस्य आचार्यस्तरीयच्छात्राणां संगोष्ठी समायोजिता। प्रो. वासुदेवशर्म्ममहोदयाः आध्यक्षम् अवहन्। प्रथमद्वितीयतृतीयस्थानभाग्भ्यः पुरस्काराः प्रदत्ताः।


शोभायात्रायाः एकं दृश्यम्

### राष्ट्रियज्योतिषसंगोष्ठी

जनवरीमासे राष्ट्रियज्योतिषसंगोष्ठ्याः विशिष्टव्याख्यानस्य आयोजनमभवत्। राष्ट्रपति-पुरस्कारभाजः प्रो. रामचन्द्रपाण्डेयमहोदयाः (अध्यक्षचरः, का.हि.वि.वि.वाराणसी) विशिष्टव्याख्यानं कृतवन्तः। ज्योतिषविभागपक्षतः तेभ्यः अभिनन्दनपत्रमपि समर्पितम्।

### स्वच्छतादिवसः

महात्मागान्धिमहोदयस्य जन्मदिवसमालक्ष्य समायोजिते स्वच्छभारताभियानान्तर्गतत्वेन परिसरे विभागीयैः विद्यार्थिभिः आचार्यैश्च अहमहमिकया श्रमदानं कृतम्। अवसरेऽस्मिन् आचार्यैः स्वच्छताप्रतिज्ञायाः प्रत्यास्मरणं कारियत्वा परिसरे आवर्षं यथासमयं स्वच्छतायै छात्राणाम् आह्वानमकारि।



सङ्गोष्ठ्यां भाषमाणः डॉ. पी.वी.बी. सुब्रह्मण्यः

## वेदव्यासपरिसरीयवार्ता

### एकदिवसीयसंस्कृतसंगोष्ठी

०१.११.२०१४ दिनाङ्के परिसरेण एकदिवसीया संस्कृतसंगोष्ठी समायोजिता। कार्यक्रमेऽस्मिन् संस्कृतभारत्याः क्षेत्रीयसंयोजकाः श्रीनरेन्द्रमहाशयाः मुख्यातिथित्वेन समाहूताः। अयं कार्यक्रमः परिसरप्राचार्याध्यक्ष्ये अथ च डॉ. गणेशशङ्करविद्यार्थि-महोदयस्य संयोजकत्वे एवञ्च श्रीवासुमोहनमहोदयस्य सहसंयोजकत्वे सम्पन्नतां यातः।

### अन्ताराष्ट्रियज्योतिषसंगोष्ठी

१८.१०.२०१४ तः १९.१०.२०१४ दिनाङ्कं यावत् परिसरे ज्योतिषविभागद्वारा द्विदिवसीया अन्ताराष्ट्रियसंगोष्ठी समायोजिता। संगोष्ठ्यां विविधस्थानेभ्यः पञ्चदशविद्वांसः, अथ च परिसरीयाः विद्वांसः, छात्राश्च भागं गृहीतवन्तः। विद्वद्भिः आहत्य पञ्चविंशतिशोधपत्राणि प्रस्तुतानि।

### एकदिवसीयव्याकरणसंगोष्ठी

व्याकरणविभागद्वारा "व्याकरणशास्त्रे निपातार्थनिर्णयः" इति विषयमधिकृत्य एक- द्विवसीयराष्ट्रियसंगोष्ठी समायोजिता। अमुष्मिन्नवसरे आचार्यः सुबोधशर्मा (भोपालपरिसरः) प्रो. श्रीधरशर्मा (आचार्यः, जयपुरपरिसरः) इत्यनयोः मुख्यवक्तृरूपेण उपस्थितिः आसीत्। एतस्मिन् कार्यक्रमे संयोजकेन डॉ. अशोकचन्दगौडमहाभागेन कार्यक्रमोऽयं चारुचालितः।

### दर्शनशास्त्रसंगोष्ठी

१६.०२.२०१५ दिनाङ्के सर्वदर्शनविभागेन एकदिवसीया दर्शनशास्त्रसंगोष्ठी समायोजिता। संगोष्ठ्यां मुख्यातिथिरूपेण श्री नरसिंहचरणपण्डा (आचार्यः साधु-आश्रमः) डॉ. प्रभाकरप्रसादः (आचार्यः, लाल.ब.शा.सं.विद्यापीठम्) च उपस्थितः आसीत्। संयोजकः श्री अशोकचन्द्रगौडः आसीत्।

## लखनऊपरिसरस्य विविधगतिविधयः

### द्विदिवसीया व्याकरणसंगोष्ठी

०८.१२.२०१५ तः ०९.१२.२०१५ दिनाङ्कं यावत् व्याकरणशास्त्रान्तर्गतं "वैयाकरणभूषण- सारस्य समालोचनम्" इति विषयमुररीकृत्य द्विदिवसीयराष्ट्रिसंगोष्ठी सञ्चालिता। तत्र उद्घाटनसत्रे मुख्यातिथिरूपेण प्रो. आजादमिश्रः (प्राचार्यचरः) समलमकोरोत्। आध्यक्ष्यं प्रो. सुरेन्द्रपाठकः (प्राचार्यः, लखनऊपरिसरः) निरवहत्।

अथ च सम्पूर्तिसत्रे मुख्यातिथिरूपेण समागताः प्रो. कमलेशझामहाभागाः (आचार्यः, का.हि.वि.वि.) आसन्। विशिष्टातिथिरूपेण च प्रो. अशोककुमारकालिया (कुलपतिचरः, सं.सं.वि.वि. वाराणसी) आसीत्। कार्यक्रमोऽयं परिसरप्राचार्यस्याध्यक्ष्ये समभवत्।



ज्योतिषसङ्गोष्ठ्याम् उपस्थिताः विद्वांसः

### एकदिवसीयवास्तुशास्त्रीयराष्ट्रियसंगोष्ठी

ज्योतिषविभागेन १५.१२.२०१५ दिनाङ्के "वर्तमानसन्दर्भे वास्तुशास्त्रस्य प्रासङ्गिकता" इति विषयमुररीकृत्य एकदिवसीयवास्तुशास्त्रीयराष्ट्रियसंगोष्ठी समायोजिता। उद्घाटनसत्रे प्रो. वृजेशकुमारशुक्लमहोदयानामुपस्थितिः आसीत्। विशिष्टातिथिरूपेण श्री जयप्रकाशत्रिपाठी (I.A.S.) संगोष्ठीं समलमकरोत्।

सम्पूर्तिसत्रे मुख्यातिथिः-ओमप्रकाशपाण्डेयः (पूर्वसचिवः, महर्षिसान्दीपनीवेदविद्या-प्रतिष्ठानम् उज्जैन) आसीत्। सर्वोऽयं कार्यक्रमः परिसरप्राचार्य्याणामाध्यक्ष्ये जातः।

### एकदिवसीयसाहित्यशास्त्रीयसंगोष्ठी

लखनऊपरिसरे साहित्यविभागेन १७.१२.२०१५ दिनाङ्के "संस्कृतवाङ्मये साहित्यविद्या साहित्यिकप्रस्थानानि च" इति विषयमादाय एकदिवसीया संगोष्ठी समायोजिता। अस्याः उद्घाटनं मुख्यातिथिरूपेण समागत-प्रो. राकेशचन्द्रा (पूर्वसंकायाध्यक्षः, लखनऊ वि. वि.) महोदयानां करकमलाभ्यां सञ्जातम्, तथैव सारस्वतातिथिरूपेण-प्रो. भारतभूषणत्रिपाठी महोदयाः उपस्थिता आसन्। एवञ्च परिसरप्राचार्याणामाध्यक्ष्ये अथ च डॉ. पवनदीक्षितमहोदयस्य संचालकत्वे समभवत्, तथैव सम्पूर्तिसमारोहे मुख्यातिथिरूपेण प्रो. आजादमिश्राः उपस्थिता आसन्, अथ च डॉ. गजाला-अंशारीद्वारा कार्यक्रमः चारुचालितः।



सम्बोधयन् अतिथिवर्यः

### एकदिवसीयशिक्षाशास्त्रीयसंगोष्ठी

शिक्षाशास्त्रविभागेन "भारतीयशिक्षायाः आदर्शस्वरूपम्" इतिविषयमाधारीकृत्य २२ दिसम्बर २०१५ तमे दिनाङ्के एकदिवसीयशिक्षाशास्त्रीयसंगोष्ठी समायोजिता।

### एकदिवसीयवेदसंगोष्ठी

वेदविभागेन "दर्शपौर्णमासयागस्य वैज्ञानिकचिन्तनम्" इति विषयं स्वीकृत्य २३ दिसम्बर २०१५ तमे दिनाङ्के एकदिवसीया वेदसंगोष्ठी समायोजिता। तत्र प्राध्यापकाः छात्राश्च भागं गृहीत्वा स्वशोधपत्रं प्रस्तुतवन्तः, कार्यक्रमेऽस्मिन् मुख्यवक्तारः ओमप्रकाशपाण्डेयमहोदयाः आसन्।

## शृङ्गेरीपरिसरवार्त्ता

### संस्कृतोत्सवः

१४.०८.२०१४ दिनाङ्के परिसरेण संस्कृतोत्सवः समायोजितः। मुख्यवक्तृरूपेण डॉ. सुरेशाचार्यः (प्राचार्यः, उडुपिसंस्कृतमहापाठशाला) समलमकरोत्। परिसरप्राचार्याणामाध्यक्ष्ये कार्यक्रमोऽयं यातः। अमुष्मिन्नवसरे नैकाः प्रतिस्पर्द्धाः सञ्चालिताः, तासु क्षेत्रीयविद्यालयानां छात्राः सोत्साहं भागं गृहीतवन्तः।

### हिन्दीदिवससमारोहः

२३.०९.२०१४ दिनाङ्के परिसरे हिन्दीदिवससमारोहः समनुष्ठितः। अत्र मुख्यवक्तारः प्रो. प्रभाशंकरप्रेमी (अध्यक्षचरः, हिन्दीविभागः, बेङ्लूरूविश्वविद्यालयः) महोदयाः आसन्। अवसरेऽस्मिन् हिन्द्यां नैकाः प्रतिस्पर्द्धाः समायोजिताः, परिसरीयाः छात्राः यथामति भागं गृहीत्वा पुरस्कारभाजः भवन्ति स्म।

### शोधसंगोष्ठी

०६.०४.२०१५ दिनाङ्के परिसरेण एकदिवसीया शोधसंगोष्ठी समनुष्ठिता। कार्यक्रमेऽस्मिन् उपविंशतिच्छात्राः भागमग्रहीषुः, इयं संगोष्ठी सी.एस्.एस्. नरसिम्हामूर्तिमहोदयस्य संयोजकत्वे अभवत्।

### वाक्यार्थपरिषद्

परिसरे प्रतिवर्षमिव ऐषमे वर्षेऽपि छात्राणां शास्त्रकौशलविकासाय वाक्यार्थपरिषद् समनुष्ठिता। अस्याः संयोजकौ डॉ. राघवेन्द्रभट्टः (सहायकाचार्यः) डॉ. सूर्यनारायणभट्टश्च (सहायकाचार्यः) वर्तेते। कार्यक्रमेऽस्मिन् परिसरीयाः सर्वे अध्यापकाः वाक्यर्थं प्रास्तुवन्।




संस्कृतोत्सवे भाषमाणः विद्वान् महाबलेश्वरभट्टवर्यः



न्यायशास्त्रीयराष्ट्रियसङ्गोष्ठीम् उद्घाटयन्
विद्वान् उमाकान्तभट्टवर्यः




व्याकरणविभागराष्ट्रियसङ्गोष्ठ्यां भाषमाणः
आचार्यः एस्.एल्.पि. आञ्जनेयशर्मवर्यः




मीमांसाशास्त्रीयराष्ट्रियसङ्गोष्ठ्यां भाषमाणः
आचार्यः नारायण अडिगवर्यः



संस्कृतविश्वविद्यालयीययुवमहोत्सवोद्घाटनसत्रस्य दृश्यम्

## एकलव्यपरिसरवृत्तान्तः

### द्वितीयः अन्तस्संस्कृतविश्वविद्यालयीययुवमहोत्सवः

०६.०१.२०१५ दिनाङ्के परिसरे कार्यक्रमोऽयं समनुष्ठितः। श्रीतपनचक्रवर्त्तिमहोदयः (उच्चशिक्षामन्त्री, त्रिपुराराज्यम्) स्वकरकमलाभ्यां कार्यक्रमस्यास्योद्घाटनं कृतवान्। श्री शहीदचौधरीमहोदयः (क्रीडामन्त्री, त्रिपुराराज्यम्) अथ च प्रो. अञ्जनकुमारघोषः (कुलपतिः, त्रिपुराविश्वविद्यालयः) क्रमेण मुख्यातिथिरूपेण एवं विशिष्टातिथिरूपेण कार्यक्रमं समलमकुर्वन्।

### विस्तरव्याख्यानम्

परिसरे साहित्यविभागद्वारा सितम्बरमासे एकादशदिनाङ्के विस्तरव्याख्यानं समनुष्ठितम्। "काव्यस्यात्मा ध्वनिः" इति विषयमादाय प्रो. शिवजी-उपध्यायः (राष्ट्रपतिसम्मानितः, अध्यक्षचरः सं.सं.वि.वि.) स्वव्याख्यानं प्राददात्।

### शैक्षिकयात्राकार्यक्रमः

०४.०३.२०१५ दिनाङ्के शिक्षाशास्त्रविभागीयाः छात्राः प्राध्यापकाश्च त्रिपुराराज्ये कानिचित् स्थलानि समालक्ष्य शैक्षिकयात्राकार्यक्रमम् अकुर्वन्।

### विस्तरव्याख्यानम्

परिसरे शिक्षाशास्त्रविभागपक्षतः ०३.१०.१४ एवं १०.१०.१४ दिनाङ्कयोः व्याख्यानद्वयं कारितम्। "शिक्षायाः महत्त्वम्" इति विषयमधिकृत्य प्रो. श्रीधरवशिष्ठमहोदयाः (कुलपतिचराः, ला.बा.शा.सं.वि.पी.) अथ च प्रो. वाचस्पतिद्विवेदिमहाशयाः (पूर्वसंकायाध्यक्षचराः, सं.सं.वि.वि.) स्वव्याख्यानं प्रस्तुतवन्तः।

### विस्तरव्याख्यानम्

परिसरस्य दर्शनविभागद्वारा "धर्मनिरपेक्षता बौद्धदर्शनञ्च" इतिविषयमभिलक्ष्य डॉ. नीलिमापाठकमहाभागया २०.०३.१५ दिनाङ्के व्याख्यानं समकारि। अवसरेऽस्मिन् परिसरीयाः छात्र-प्राध्याकाश्च सर्वे समवेताः आसन्।

## विशिष्टसंस्कृतसेवाव्रतिसम्मानः 2015



डा. अम्बाकुलकर्णी


डा. अम्बाकुलकर्णिमहोदयायाः जन्म 5 मार्च, 1961तमे वर्षे बिहारराज्यस्य पाटलिपुत्रे अभवत्। तस्याः अध्ययनं गणितविज्ञानयोः संवृत्तम्। यद्यपि आदौ सा संस्कृतक्षेत्रे अध्ययनं न प्रवर्तितवती, तथापि तस्याः अवदानं संस्कृतक्षेत्रे श्लाघनीयं वर्तते। 1982तमे वर्षे सा कोल्हापुरस्थ-शिवाजीविश्वविद्यालयतः गणितविषये स्नातकोत्तरपदवीं प्राप्तवती। ततः 1994तमे वर्षे सा आई.आई.टी. कानपुरतः सङ्गणकविज्ञाने अभियान्त्रिकीविज्ञाने च स्नातकोत्तरोपाधिं प्राप्तवती। 2010तमे वर्षे हैदराबादविश्वविद्यालयतः प्रायोगिकभाषाविज्ञाने (Applied Linguistics इत्यत्र) शोधोपाधिं (पीएच.डी.) प्राप्नोत्। पाणिनीय-अष्टाध्याय्यां तस्याः विशिष्टा अभिरुचिः वर्तते।

साम्प्रतं सा हैदराबादविश्वविद्यालयस्य संस्कृतविभागे उपाचार्यात्वेन संस्कृतसेवां कुर्वाणा वर्तते। आविंशतेः वर्षेभ्यः सा अन्ताराष्ट्रियस्तरे सङ्गणकीयसंस्कृतभाषाविज्ञानम् (Sanskrit Computational Linguistics) इत्यस्मिन् क्षेत्रे कार्यं कुर्वती अस्ति। संस्कृतस्य आनलाईन-कम्प्यूटेशनल- साधनक्षेत्रे तस्याः योगदानमतीव महत्त्वपूर्णं वर्तते। स्वीयसंस्कृतशिक्षणं प्रति विद्यमानां रुचिं परिपूरयितुं सा 2012तमे वर्षे मैसूरस्थ-कर्णाटकराज्यमुक्त- विश्वविद्यालयतः संस्कृते स्नातकोत्तरपदवीं प्राप्तवती। अस्याः संस्कृत-सेवामुपलक्ष्य हरियाणासंस्कृत-अकादम्या तस्यै 2014तमे वर्षे संस्कृत- सेवासम्मानः प्रदत्तः।

अस्याः इदं वैशिष्ट्यं वर्तते यद् विश्वविद्यालयीयपरीक्षासु सा सर्वत्र प्रथमं स्थानमलभत। तस्याः 6 ग्रन्थाः 42 शोध-पत्राणि च प्रकाशितानि। एतदतिरिच्य विविधग्रन्थेषु तस्या 10 पाठाः शोधालेखाश्च प्रकाशिताः।

'प्राकृतिकभाषाप्रक्रिया' (NLP-Natural Language Process) इत्यस्मिन् विषये तस्याः विशिष्टं कार्यं वर्तते। संस्कृतज्ञानस्य वैश्विकोपयोगाय सर्वजनोपलब्धतायै च सा नैकेषां तन्त्रांशानां (Softwares इत्येतेषां) विकासमकरोत्। तस्याः सिद्ध-सङ्गणकीय-साधनानां (Online Computational Tools) संस्कृतक्षेत्रे बहु प्रशंसा वर्तते।

संस्कृतोन्नयनसङ्कल्पशीलेयं विदुषी निरन्तरं प्रौद्योगिकीसाधनानामुपयोगेन संस्कृतश्रियं विवर्धयितुम् अग्रेसरा वर्तते। नूनम् अस्याः अयं सङ्कल्पः प्रशंसार्हः प्रणम्यश्च वर्तते।



## श्री के. लक्ष्मीनरसिंहन्


श्री के. लक्ष्मीनरसिंहन् महोदयो मूलतः विज्ञानस्य अध्येता वर्तते। अनेन तमिलनाडुराज्यस्य सेलमस्थराजकीयाभि-यान्त्रिकमहाविद्यालयात् अभियान्त्रिकीशास्त्रे स्नातकोपाधिरर्जितः। शिक्षणोपरान्तमनेन द्वाविंशतिवर्षाणि यावत् विभिन्नसंस्थासु अभियान्त्रिकीक्षेत्रे कार्यं कृतम्। ब्रिटेनदेशे एकवर्षं यावत् प्रायोजनाधिकारिपदेऽपि अनेन कार्यं कृतम्। ततः 2010तमे क्रैस्ताब्दे अक्टूबरमासे सर्वं त्यक्त्वा सः संस्कृतसेवायै संस्कृत-संवर्धन-प्रतिष्ठाने आत्मानमनियोजयत्।

अनेन संस्कृत-संवर्धन-प्रतिष्ठानस्य आधारभूतं संस्कृतसंवर्धनरूपं कार्यमभिलक्ष्य विविधाः परियोजनाः सञ्चालिताः सञ्चाल्यमानाश्च वर्तन्ते, याः नरसिंहन्-महोदयस्य संस्कृतं प्रति अनुरागं स्वतः प्रकटयन्ति। अनेन आई.आई.टी. मुम्बय्याः सहकर्तृत्वेन सम्भाषणात्मक-संस्कृत-अनुशिक्षणस्य आरम्भो विहितः। विविधप्रान्तेषु विद्यमानविश्वविद्यालयेषु संस्कृतविकीपीडियायाः अभिप्रेरणात्मके प्रशिक्षणेऽपि अनेन महती भूमिका विहिता। शोधकार्यस्य पद्धतीः विषयांश्चालक्ष्य अनेन संस्कृतक्षेत्रे नूत्नानां मासिकगोष्ठीनाम् आयोजनं समारब्धम्।

अनेन 2011तमे वर्षे बेङ्गलूरुनगरे आयोजिते 'विश्वसंस्कृतपुस्तकमेला' इत्याख्ये अपि च 2013तमे वर्षे उज्जयिनीनगरे आयोजिते 'संस्कृतसाहित्योत्सवः' इत्याख्ये कार्यक्रमे च नूतनसंस्कृतसाहित्यप्रकाशने सक्रिय-समन्वयात्मकभूमिका निर्व्यूढा। देहलीस्थेषु चतुर्षु विद्यालयेषु 'संस्कृतं केवलं संस्कृतमाध्यमेन' इति परियोजनाऽपि अनेनारब्धा। अनेन नूतनतया संस्कृतशिक्षणाय ई-संस्कृतशिक्षणाय च विद्यालयशिक्षणस्तरे उच्चशिक्षणस्तरे च बहवः अभिनवाः प्रयोगाः विहिताः। नैकेषु विश्वविद्यालयेषु महाविद्यालयेषु च अनेन एकविंशतिदिवसात्मक-संस्कृत-सम्भाषणशिबिराणाम् आयोजनं कृतम्।

संस्कृतसंवर्धनप्रतिष्ठानस्य एतासां विविधप्रायोजनानां सफलसञ्चालने लक्ष्मीनरसिंहमहोदयस्य अप्रतिमा अनवराघ्या भूमिका वरीवर्ति। प्रतिष्ठानाय कार्यपालक-अधिकारिरूपेण एतस्य अवदानम् अभूतपूर्वं वर्तते। एषः महानुभावः अहर्निशं संस्कृतस्य सेवायै आत्मानं समर्पितवान् अन्यांश्च तत्कर्तुं प्रेरयति चेति तस्य संस्कृतं प्रति अस्ति विशिष्टा सेवाव्रतिता एव।

## डा. जयन्तकुमारदीर्घाङ्गी



डा. जयन्तकुमारदीर्घाङ्गी मूलतः चिकित्सको वर्तते। एतस्य जन्मस्थानं पश्चिमवङ्गस्य पश्चिममिदना-पुरस्थं जयन्तीपुरमिति ग्रामो वर्तते। बाल्यकालतः एव अस्य रुचिः संस्कृतं वैदिकशास्त्राणि च प्रति वर्तते। आधुनिक- पद्धत्या अध्ययनं विधायापि प्राच्यज्ञानस्य संरक्षणे अनेन महती भूमिका विहिता। अनेन एम.डी., एफ.ए.सी.ओ.जी., एफ.ए.सी.एस., एफ.आई.सी.एस. चेति उपाधयः प्राप्ताः। सः अमेरिकायां प्रसूतिविज्ञाने स्त्रीरोगचिकित्साशास्त्रे च विशेषेण ख्यातिमलभत, तथापि वैदिकज्ञानं प्रति अभिरुचिकारणात् तत्संरक्षणक्षेत्रेऽपि अयं दत्तचित्तो वर्तते। अयं नित्याग्निहोत्री सोमयाजी च वर्तते। अनेन स्वीयं जीवनं संस्कृतशिक्षणस्य वैदिकपरम्परायाः च समुन्नयनार्थं समर्पितं वर्तते।

पश्चिमवङ्गे संस्कृतस्य अध्ययन-अनुसन्धानयोः उन्नतये सः अनेकानि कार्याणि अकरोत्। जनसाधारणे वेदानां प्रचारणेन तत्सम्बद्धानुष्ठानानां च प्रदर्शनेन सः महत्किमपि कार्यमकरोत्। सः पश्चिममिदनापुरजनपदे खड्गपुरसमीपस्थे स्वीयजन्मस्थले जयन्तपुरग्रामे 'वेद-भवनम्' इति विशालपरिसरस्य निर्माणं कारयित्वा तत्र वैदिकशिक्षणस्य व्यवस्थाम् अकारयत्। अस्मिन् परिसरे वेदपाठशाला, मन्दिरं, वैदिकोद्यानं गोशाला च वर्तन्ते। अत्रैव वैदिकपद्धत्या यागशाला, रथशाला, पुष्करिणी, कूपः, रथः अतिथिगृहं चेत्यादीनामपि निर्माणमनेन कारितं वर्तते। अस्मिन् एव सन्दर्भे इदं ज्ञापनीयं वर्तते यत् अनेन नैकत्र वैदिकयज्ञानां समायोजनं कृत्वा तत्प्रायोगिकत्वं प्रतिपादितं प्रतिष्ठापितञ्च। दीनदरिद्राणां कृते आधुनिकसुविधासम्पन्नस्य चिकित्सालयस्य आयुर्वेदमहाविद्यालयस्य च स्थापनार्थं तस्य सङ्कल्पो वर्तते। स्वस्थापिते महाविद्यालये वेदानां 12 शाखानां शिक्षणं प्रवर्तयितुमपि सः प्रयासरतो वर्तते।

वैदिकपरम्परायाः प्रचाराय सः प्रतिवर्षं तत्र तत्र सांस्कृतिकान् कार्यक्रमान् आयोजयति। तदङ्गतया व्याख्यानानि, वैदिकपरम्पराप्रदर्शिनी, रथयात्रा इत्यादिकार्यक्रमाः तत्र भवन्ति। सः बहूनि व्याख्यानानि अपि प्रादात् ग्रन्थान् च प्राकाशयत्। साम्प्रतं सः अमेरिकादेशे तिष्ठति, किन्तु भविष्यति काले भारतमागत्य संस्कृतस्य वैदिकशिक्षणस्य च सेवां कर्तुं सङ्कल्पवान् वर्तते इत्यस्ति तस्य शुभसङ्कल्पः संस्कृतसेवाव्रतधारणं च।

# राष्ट्रियसंस्कृतसंस्थानम्

( राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए-श्रेण्यां' प्रत्यायितः,
भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः )

# मुक्तस्वाध्यायपीठम्

## दूरस्थशिक्षाविधिना उपाधिपाठ्यक्रमाः प्रमाणपत्रीयपाठ्यक्रमाश्च

**प्राक्शास्त्री ( +2 )** अवधिः- वर्षद्वयम्। अर्हता- ससंस्कृतं दशमकक्षोत्तीर्णता तत्समकक्षोत्तीर्णता वा।

**सेतुपाठ्यक्रमः ( संस्कृतावतरणी )** (प्राक्शास्त्रिप्रवेशाय) अवधिः- 6 मासाः। अर्हता- विना संस्कृतं दशमकक्षोत्तीर्णता।

**शास्त्री ( बी.ए. )** (व्याकरणे साहित्ये फलितज्यौतिषे) अवधिः- वर्षत्रयम्। अर्हता- प्राक्शास्त्री/ तत्समकक्षोत्तीर्णता।

**सेतुपाठ्यक्रमः ( संस्कृतावगाहनी )** (शास्त्रिप्रवेशाय) अवधिः- एकवर्षम्। अर्हता- विना संस्कृतं द्वादशकक्षोत्तीर्णता

**आचार्यः ( एम्.ए. )** (व्याकरणे साहित्ये फलितज्योतिषे) अवधिः-वर्षद्वयम्। अर्हता- स्नातककक्षोत्तीर्णता तत्समकक्षोत्तीर्णता वा।

**सेतुपाठ्यक्रमः ( शास्त्रावगाहनी )** (आचार्यप्रवेशाय) अवधिः-एकवर्षम्। अर्हता- त्रिवर्षीयस्नातककक्षोत्तीर्णता तत्समकक्षोत्तीर्णता वा।

**संस्कृतपत्रकारिताप्रमाणपत्रीयपाठ्यक्रमः** - अवधिः- 6 मासाः। शुल्कम्-1000/-। अर्हता- बी.ए./तत्समकक्षोत्तीर्णता।

**पालिप्रमाणपत्रीयपाठ्यक्रमः** - अवधिः- 6 मासाः। शुल्कम्-1000/-। अर्हता- बी.ए./तत्समकक्षोत्तीर्णता।

**प्राकृतप्रमाणपत्रीयपाठ्यक्रमः** - अवधिः- 6 मासाः। शुल्कम्-1000/-। अर्हता- बी.ए./तत्समकक्षोत्तीर्णता।

**पालिपरिचयपाठ्यक्रमः** - अवधिः- 3 मासाः। शुल्कम्-500/-। अर्हता- दशमकक्षा/तत्समकक्षोत्तीर्णता।

**प्राकृतपरिचयपाठ्यक्रमः** - अवधिः- 3 मासाः। शुल्कम्-500/-। अर्हता- दशमकक्षा/तत्समकक्षोत्तीर्णता।

**आचार्यप्रवेशपरीक्षा, दिनाङ्कः - 21.08.2016, रविवासरः 11.00 वादने**

अभ्यार्थिनः संस्थानस्य विश्वव्यापिजालपुटात् आवेदनपत्रं स्वीकृत्य विवरणिकां च सूक्ष्मतया परिशील्य प्रवेशमभिलषितपाठ्यक्रमस्य निर्धारितशुल्कं मुक्तस्वाध्यायपीठस्य अधोनिर्दिष्टकोषे इलेक्ट्रोनिक्माध्यमेन ( NEFT द्वारा ) समर्प्य, शुल्कराशि-समर्पणस्य प्रमाणम् (Transaction no./Reference no. etc) आवेदनपत्रे, निर्दिष्टस्थाने उल्लिख्य मुक्तस्वाध्यायपीठस्य कस्मिंश्चिदपि स्वाध्यायकेन्द्रे ( यत्र अभ्यर्थी सम्पर्ककक्षा, प्रवेशपरीक्षा, सत्रान्तपरीक्षादिकं भवेदिति वाञ्छति ) समर्पयेयुः। साक्षात् धनं/चालान्/मनी आर्डर (M.O.) [ पोस्टल् आर्डर् न स्वीक्रियते। शुल्कराशिसमर्पणाय वित्तकोषविवरणम्- कोषधारकस्य नाम - मुक्तस्वाध्यायपीठम्, नवदेहली, खाता-संख्या -35856336266 आई.एफ.एस्. कोड् - SBIN 0000733, वित्तकोषस्य नाम - State Bank of India, Delhi Cantonment, Nangal Raya, New Delhi. प्रपूरितावेदनपत्रं समर्पयितुम् अन्तिमदिनाङ्कः - विना विलम्बशुल्कम् 12.08.2016, शतस्य रूप्यकाणां ( 100/- ) विलम्बशुल्कसहितम् - 31.08.2016 ( प्रवेशपरीक्षां विना प्रवेष्टुम् अर्हाणां कृते एव )

**देहली-इलाहाबाद-पुरी-जम्मू-गुरुवायूरु-जयपुर-लखनऊ-शृङ्गेरी-बलाहार-भोपाल-मुम्बई-अगरतलापरिसर-स्वाध्यायकेन्द्रेभ्यः इमे पाठ्यक्रमाः कर्तुं शक्यन्ते।**


**मुक्तस्वाध्यायपीठम्**

राष्ट्रियसंस्कृतसंस्थानम्, ५६-५७, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-११० ०५८

दूरवाणी - ०११-२८५२३६११

**E-mail** - mspeetham@gmail.com, mspeetham@yahoo.co.in

website : www.sanskrit.nic.in/msp



Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.VI Issue Nos.25-32 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007